कृष्णदास संस्कृत सीरीज ६७
CC-O. In Public Domain. Digitized by eGangotri

कुमारसम्भवम्

सान्वय-'सुधा'-संस्कृत-हिन्दीव्याख्योपेतम्

व्याख्याकारः
पं० परमेश्वरदीन पाण्डेयः

कृष्णदास अकादमी, वाराणसी
Sri Vidyabharathi Book Centre, Singeri

CC-O. In Public Domain. Digitized by eGangotri

Sri Vidyabharathi Book Centre, Sringeri

CC-0. In Public Domain. Digitized by eGangotri

कृष्णदास संस्कृत सीरीज

६७

महाकविकालिदासविरचितं

कुमारसम्भवम्

'सुधा'-संस्कृत-हिन्दीव्याख्योपेतम्

व्याख्याकारः

पं० परमेश्वरदीन पाण्डेयः

एम० ए० (संस्कृत-हिन्दी), साहित्याचार्यः, साहित्यरत्नम्

(सर्गः ४)

SRI VIDYA BHARATHI
BOOK CENTRE
Bharathi Street,
SRINGERI - 577 139.

कृष्णदास अकादमी, वाराणसी

Sri Vidyabharathi Book Centre, Sringeri

प्रकाशक : कृष्णदास अकादमी, वाराणसी
मुद्रक : चौखम्बा प्रेस, वाराणसी
संस्करण : प्रथम, वि० सं० २०४२
मूल्य रु० [illegible]

CC-O. In Public Domain. Digitized by eGangotri

CHOWKHAMBA SANSKRIT SERIES OFFICE
REVISED PRICE Rs. 8
VARANASI-1

© KRISHNADAS ACADEMY

Oriental Publishers & Distributors
POST BOX No. 1118
Chowk, (Chitra Cinema Building), Varanasi-221001
(INDIA)

अपरं च प्राप्तिस्थानम्
चौखम्बा संस्कृत सीरीज आफिस
के० ३७/९९, गोपाल मन्दिर लेन
पो० बा० १००८, वाराणसी-२२१००१ (भारत)
फोन : ६३१५५

Sri Vidyabhavan Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

कथासार

(प्रश्नोत्तरात्मक 'प्रस्तावना' प्रथम सर्ग में पढ़िए)

इस चतुर्थ सर्ग में शिव-पार्वती परिणय के प्रसंग को लेकर भगवान् शंकर की समाधि को भग्न करने वाले कामदेव के ऊपर अति क्रुद्ध शंकर जी के तृतीय नेत्र की प्रचण्ड ज्वाला से भस्मीभूत कामदेव के शरीर की उड़ती हुई भस्म-राशि को देख कर कामदेव की पत्नी रति छाती पीट-पीट कर विलाप करती है—

हे प्राणनाथ ! मुझे अकेली छोड़ कर आप कहाँ चले गए ? आप तो कहते थे कि—तुम हमेशा मेरे हृदय में विराजती रहती हो ? अगर यह सच है तो आपके साथ मैं भी क्यों नहीं भस्मसात हो गई ? आप तो कठोर होकर मुझे छोड़ गए, पर मैं आप को नहीं छोड़ूँगी, शीघ्र ही आप का अनुसरण करूंगी—जल कर राख हो जाऊँगी। हाय ! निशा रात में अभिसारिकाओं का अब कौन सहायक होगा ? ऋतुराज वसन्त का भी शोभावर्धक कौन बनेगा ? हे कुसुमायुध ! आपके नहीं रहते आम की मंजरी किस का बाण बनेगी ? हे प्रियतम ! आप के अभाव में कमल, कुमुदिनी, पूर्णचन्द्र आदि सभी प्रभा-हीन हो जायँगे। हे अनंग ! एक बार शरीर धारण कर देखिए, आपके शरीर के भस्मावशेष को देख-देख कर भ्रमरों के पुंज सुमधुर गुंजन छोड़ कर मेरे जैसे आँसू बहा रहे हैं। हे प्रियतम ! अति प्रेमावेश में आकर आज ही आप अपने कर-कमलों से मेरे हाथों में फूलों के अलंकरण सजा कर मेरे परों को महावर से रंगना आरंभ किये और एक पैर रंगना बाकी रहा ही कि वहाँ से उठ कर यहाँ आकर आप सदा के लिए चल बसे।

इस प्रकार हृदयविदारक विलाप रति कर ही रही थी कि इतने में कामदेव के अभिन्न सहचर वसन्त आ पहुँचे। उन्हें देखते ही रति का दुःखानल भभक उठा, वह विविध प्रकार के विलाप करती हुई कहने लगी—प्रिय वसन्त ! मित्रों की विपद्-ग्रस्त स्त्रियों को मित्रों के निकट पहुँचा देना मित्रों का कर्तव्य होता है। अतः पुरोवर्ती अपने मित्र की भस्म-राशि पर ही मेरी चिता लगा दो। उस पर मैं सो जाऊँगी और तुम उसमें आग लगा कर मुझे अपने मित्र (अनंग) के निकट पहुँचा दो !

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

इसी समय आकाशवाणी हुई--हे रति ! ठहरो, कुछ समय प्रीतम मिलन की प्रतीक्षा करो । यह सब कुकाण्ड ब्रह्माजी के शाप के कारण हुआ है । एक समय तुम्हारे पति कामदेव ने ब्रह्माजी को कामवाण से कामान्ध कर दिया था । इसी पर क्रोधावेश में आकर ब्रह्माजी ने शाप दे दिया था कि--एक दिन समाधिस्थ शंकरजी को जब तुम मेरे जैसा कामान्ध करना चाहोगे उसी क्षण उनके तृतीय नेत्र की प्रखर ज्वाला से भस्मसात हो जाओगे और शिव-पार्वती के विवाह हो जाने पर वही शंकरजी तुम्हें शाप से मुक्त कर नया जीवन प्रदान करेंगे । यह सुन कर रति पूर्ण विश्वस्त होकर शिव-पार्वती-परिणय की प्रतीक्षा करने लगी ।

दीपावली
वि. सं. २०४२

--रामचन्द्र झा

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

कुमारसम्भवम्

सान्वय 'सुधा' संस्कृत-हिन्दीव्याख्योपेतम्

चतुर्थः सर्गः

अथ मोहपरायणा सती विवशा कामवधूर्विबोधिता ।
विधिना प्रतिपादयिष्यता नववैधव्यमसह्यवेदनम् ॥ १ ॥

अन्वयः—अथ मोहपरायणा सती विवशा कामवधूः असह्यवेदनं नववैधव्यं प्रतिपादयिष्यता विधिना विबोधिता ।

व्याख्या—अथेति । अथ=अनन्तरम् । मोहपरायणा–मोहः परम् अयनं यस्याः सा मोहपरायणा=मोहाश्रयंगता सती ('परायणमभिप्रेते तत्परे परमाश्रये' इति यादवः) । विवशा–विगतः वशः यस्याः सा=निश्चेष्टा । कामवधूः–कामस्य=मदनस्य वधूः=भार्या, रतिः । असह्यवेदनम्–सोढुं योग्या सह्या न सह्या असह्या, असह्या वेदना यस्मिंस्तत्=दुःसहपीडम् । नववैधव्यम्–विधवायाः भावो वैधव्यं, नवं च तद्वैधव्यं नववैधव्यम् = नूतनं भर्तृनाशत्वम् ('प्रत्ययोऽभिनवो नव्यो नवीनो नूतनो नवः' इत्यमरः) । प्रतिपादयिष्यता=अनुभवं कारयिष्यता । विधिना = भाग्येन ('दैवं दिष्टं भागधेयं भाग्यं स्त्री नियतिर्विधिः' इत्यमरः) । विबोधिता = प्रबोधिता । सर्गेऽस्मिन् वियोगिनीवृत्तानि । तद्यथा—'विषमे ससजा गुरुः समे सभरालोऽथ गुरुर्वियोगिनी' इति ।

सरलार्थः—शिवस्य तिरोधाने पार्वत्याश्च स्वभवनं प्रयाते सति मोहंगता निश्चेष्टा रतिः नव्यवैधव्यस्यासह्यदुःखमनुभावयिष्यता भाग्येन प्रबोधिता ।

हिन्दी—शिवजी के अन्तर्ध्यान हो जाने पर तथा पार्वती जी के घर चले जाने पर मूर्छित निश्चेष्ट रति को नवीन वैधव्य के असह्य दुःख का अनुभव कराने के लिए भाग्य ने उसे होश में किया ॥ १ ॥

अवधानपरे चकार सा प्रलयान्तोन्मिषिते विलोचने ।
न विवेद तयोस्तृतीयकं प्रियमत्यन्तविलुप्तदर्शनम् ॥ २ ॥

CC-O. Jangamwadi Math Collection. Digitized by eGangotri

CC-O. In Public Domain. Digitized by eGangotri

अन्वयः—सा प्रलयान्तोन्मिषिते विलोचने अवधानपरे चकार। किन्तु प्रियम् अतृप्तयोः तयोः अत्यन्तविलुप्तदर्शनं न विवेद।

व्याख्या—अवधानपर इति। सा=कामपत्नी रतिः। प्रलयान्तोन्मिषिते—प्रलयस्यान्तः प्रलयान्तः, तस्मिन्नुन्मिषिते = मूर्छावसानोन्मीलिते ('प्रलयो नष्टचेतना' इत्यमरः) विलोचने = नयने। अवधानपरे=ध्यानतत्परे। चकार = अकरोत्। किन्तु=परञ्च। प्रियम् = वल्लभम् ('अभीष्टेऽभीप्सितं हृद्यं दयितं वल्लभं प्रियम्' इत्यमरः)। अतृप्तयोः—न तृप्ते अतृप्ते, तयोः=असन्तुष्टयोः। तयोः=उभयोः नेत्रयोः। अत्यन्तविलुप्तदर्शनम्—अत्यन्तं विलुप्तं दर्शनं यस्य सः, तम् = महद्विनष्टम् अवलोकनम्। न विवेद=नाजानात्।

सरलार्थ—कामपत्नी रतिः मोहावसानोन्मीलिते नयने ध्यानपरे कृतवती किन्तु वल्लभमतृप्तनयनयोः अत्यधिकनष्टावलोकनं नाजानात्।

हिन्दी—कामपत्नी रति ने मूर्छा समाप्त होने पर आँखें खोलकर ध्यान से देखा किन्तु (अपने) 'प्राणवल्लभ (कामदेव) का दर्शन अत्यन्त दुर्लभ है।' यह बात (काम का शिव के द्वारा भस्म किया जाना) न जान सकी॥ २॥

अयि जीवितनाथ! जीवसीत्यभिधायोत्थितया तया पुरः।
ददृशे पुरुषाकृति क्षितौ हरकोपानलभस्म केवलम्॥ ३॥

अन्वयः—अयि जीवितनाथ! जीवसि? इति अभिधाय उत्थितया तया पुरः क्षितौ पुरुषाकृति केवलं हरकोपानलभस्म ददृशे।

व्याख्या—अयीति। अयि जीवितनाथ = हे प्राणनाथ! जीविसि = किं जीवन धारयसि। इति = एवम्। अभिधाय=कथयित्वा। उत्थितया=उद्गतया। तया = रत्या। पुरः=समक्षम्। क्षितौ=पृथिव्याम् ('क्षोणिर्ज्या काश्यपी क्षितिः' इत्यमरः)। पुरुषाकृति—पुरुषस्याकृतिरिवाकृतिर्यस्य तत्=पुरुषाकारम्। केवलम्=शवम्। हरकोपानलभस्म—हरस्य कोपानलः हरकोपानलः तस्य भस्म=शिवक्रोधाग्निभूतिः ('भूतिर्भसितभस्मनी' इत्यमरः)। ददृशे = अपश्यत्।

सरलार्थः—हे प्राणनाथ! किं त्वं प्राणान् धत्से? एवमुक्त्वा पार्श्वं गत्वा समक्षं नराकारं केवलं शिवक्रोधाग्निभस्मापश्यत्।

हिन्दी—(रति बोली) 'हे प्राणनाथ! क्या तुम जीवित हो? ऐसा कहकर समीप जाकर सामने पड़ी हुई नराकृति वाली शिवजी के कोपानल की भस्म देखी॥ ३॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

अथ सा पुनरेव विह्वला वसुधाऽऽलिङ्गनधूसरस्तनी ।
विललाप विकीर्णमूर्धजा समदुःखामिव कुर्वती स्थलीम् ॥ ४ ॥

अन्वयः—अथ पुनः एव विह्वला वसुधाऽऽलिङ्गनधूसरस्तनी विकीर्णमूर्धजा सा स्थलीं समदुःखां कुर्वती इव विललाप ।

व्याख्या—अथेति । अथ=अनन्तरम् । पुनः=भूयः एव । विह्वला=व्याकुला ('विक्लवो विह्वला स्यात् तु' इत्यमरः) । वसुधाऽऽलिङ्गनधूसरस्तनी—वसुधायाः आलिङ्गनम् वसुधालिङ्गनम्, तेन धूसरौ स्तनौ यस्याः सा=धराश्लेषपाण्डुपयोधरी ('सर्वंसहा वसुमती वसुधोर्वी वसुन्धरा' इत्यमरः) । ('ईषत्पाण्डुस्तु धूसरः' इत्यमरः) । विकीर्णमूर्धजा=मूर्ध्नि जाता मूर्धजा, विकीर्णा मूर्धजा यस्याः सा=विक्षिप्तकचा ('चिकुरः कुन्तलो बालः कचः केशः शिरोरुहः' इत्यमरः) । सा=रतिः । स्थलीं=तपोवनभूमिम् । समदुःखाम्—समं=सदृशं दुःखं यस्याः सा ताम्=आत्मसदृशपीडिताम् । कुर्वतीं = विदधतीम् । इव=यथा । विललाप=विलापं चकार ।

सरलार्थः—मदनमृत्युपश्चात् विह्वला रतिः धराऽऽश्लेषपाण्डुपयोधरी विक्षिप्तकेशा तां तपोवनभूमिं स्वसमशोकां कुर्वती यथा विलापं चकार ।

हिन्दी—काम की मृत्यु के अनन्तर व्याकुल हो भूमि पर लोटने के कारण धूलधूसरितस्तनोंवाली तथा बिखरे केशोंवाली कामपत्नी रति उस तपोवन की भूमि को अपने समान ही दुःखी करती हुई विलाप करने लगी ॥ ४ ॥

अथ रतेर्विलापमाह—

उपमानमभूद्विलासिनां करणं यत्तव कान्तिमत्तया ।
तदिदं गतमीदृशीं दशां न विदीर्ये कठिनाः खलु स्त्रियः ॥ ५ ॥

अन्वयः—तव यत् करणं कान्तिमत्तया विलासिनाम् उपमानम् अभूत् तत् इदम् ईदृशीं दशां गतं तथापि अहं न विदीर्ये । (हि) स्त्रियः कठिनाः खलु ।

व्याख्या—उपमानमिति । तव=ते प्राणवल्लभस्य । यत् करणं=यद् वपुः ('करणं साधकतमं क्षेत्रगात्रेन्द्रियेष्वपि' इत्यमरः) । कान्तिमत्तया=सुन्दरतया । विलासिनाम्=विलासिजनानाम् । उपमानम्=उपमाभूतम् । अभूत्=बभूव । तत् इदम्=एतत् । ईदृशीं दशाम्=इमामवस्थाम् । गतम्=प्राप्तम् । तथापि

Sri Vidyabharathi Book Centre, Chingoli

CC-O. In Public Domain. Digitized by eGangotri

अहं न विदीर्ये=न विदीर्णा भवामि। (हि) स्त्रियः=नार्यः। कठिनाः=कठोराः (दारुणं कठिनं क्रूर कठोरं निष्ठुरं दृढमि' त्यमरः)। खलु=निश्चयेन भवन्तीति। अत्रार्थान्तरन्यासोऽलङ्कारः।

सरलार्थः— प्राणनाथ !) तव यच्छरीरं सौन्दर्येण विलासिजनानामुपमाऽऽधारमभवत् तदेतत् ईदृशीमवस्थां प्राप्याह विदीर्णा कथं न भवामि। सत्यं नार्यः कठोराः भवन्ति।

हिन्दी—हे प्राणनाथ ! तुम्हारा जो शरीर सौन्दर्य के कारण विलासी पुरुषों का उपमान बना हुआ था वह इस दशा को पहुँच कर विदीर्ण क्यों नहीं हो गया। वास्तव में स्त्रियाँ कठोर होती हैं॥ ५॥

क्व नु मां त्वदधीनजीवितां विनिकीर्य क्षणभिन्नसौहृदः।
नलिनीं क्षतसेतुबन्धनो जलसङ्घात इवासि विद्रुतः॥६॥

अन्वयः—क्षतसेतुबन्धनः जलसंघातः नलिनीम् इव त्वदधीनजीविताम् मां विनिकीर्य क्षणभिन्नसौहृदः सन् क्व नु विद्रुतः असि।

व्याख्या-क्व न्विति। क्षतसेतुबन्धनः—सेतोः बन्धनं, सेतुबन्धनं क्षतं सेतुबन्धनं येन सः=नष्टालिबन्धनः ('सेतुरालौ स्त्रियां पुमान्' इत्यमरः)। जलसंघातः-जलस्य संघातः जलसंघातः=वारिसमूहः। नलिनीम् इव=कमलिनीमिव। त्वदधीनजीविताम्-त्वत्=तव अधीनं=वशीकृतं जीवित=जीवनम् यस्याः सा, ताम्। मां=रतिम्। विनकीर्य-विक्षिप्य। क्षणभिन्नसौहृदः-शोभनं हृदयं यस्य सः सुहृत्, तस्य भावः सौहृदम्, क्षणं भिन्नं सौहृदं येन सः=क्षणत्यक्तसौहृदः सन्। क्व नु विद्रुतः असि=कुत्र खलु पलायितः असि ('अथ मित्रं सखा सुहृत्' इत्यमरः)।

सरलार्थः—(हे प्रिय !) नष्टसेतुबन्धनो वारिसमूहकमलिनीमिव तवाधीनजीवां मां रतिं विक्षिप्य क्व पलायितः असि।

हिन्दी—जिस प्रकार नष्ट हुए सेतुबन्धन वाला जलसमूह नलिनी को इधर उधर बिखेर देता है वैसे ही तुम्हारे अधीन जीवनवाली मुझ रति को क्षण भर में प्रेम को तोड़कर कहाँ चले गये हो॥ ६॥

कृतवानसि विप्रियं मे प्रतिकूलं न च ते मया कृतम्।
किमकारणमेव दर्शनं विलपन्त्यै रतये न दीयते॥७॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

अन्वयः—त्वं मे विप्रियं न कृतवान् असि मया च ते प्रतिकूलं न कृतम्। अकारणम् एव विलपन्त्यै रत्यै दर्शनं किम् न दीयते।

व्याख्या—कृतवानिति। (हे प्रिय!) त्वम्=भवान्। मे=मम स्वभार्यायाः रत्याः। विप्रियम्=अप्रियम्। न कृतवान् असि=नैव सम्पादितवान् असि। मया=रत्या च। प्रतिकूलं=विरुद्धम्। न कृतम्=नैवाचरितम्। अकारणम्–नैव कारणं यस्मिन् कर्मणि तद् अकारणम्=निष्कारणम् एव। विलपन्त्यै=विलापं कुर्वन्त्यै। रत्यै=स्वभार्यायै। दर्शनम्=प्रत्यक्षतां किं न दीयते=किमर्थं न वितीर्यते।

सरलार्थः—हे प्रिय त्वया कदापि ममानिष्टं न कृतम्, मयाऽपि च तव विपरीतमाचरणं न कृतम्, अतः स्वप्रियां मामेव विलपन्तीमकारणं किमर्थं दर्शनं न ददासि।

हिन्दी—(हे प्राणनाथ) तुमने कभी भी मेरा अनिष्ट नहीं किया तथा मैंने भी कभी तुम्हारे विपरीत आचरण नहीं किया (फिर) अकारण रोती विलाप करती मुझ रति को आप दर्शन क्यों नहीं दे रहे हैं? ॥७॥

स्मरसि स्मर! मेखलागुणैरुत गोत्रस्खलितेषु बन्धनम्।
च्युतकेशरदूषितेक्षणान्यवतंसोत्पलताडनानि च ॥८॥

अन्वयः—हे स्मर! गोत्रस्खलितेषु मेखलागुणैः बन्धनं स्मरसि? उत च्युतकेशरदूषितेक्षणानि अवतंसोत्पलताडनानि च स्मरसि।

व्याख्या—स्मरसीति। हे स्मर=हे मदन! गोत्रस्खलितेषु गोत्रे स्खलितानि गोत्रस्खलितानि, तेषु=नामवत्यासेषु ('गोत्रं नाम्न्यचले कुले' इति विश्वः) मेखलागुणैः=मेखलायाः गुणाः मेखलागुणास्तैः=काञ्चीसूत्रैः। बन्धनं=प्रसृतिम् ('बन्धनं प्रसृतिश्चारः' इत्यमरः)। स्मरसि=स्मरणं करोषि। उत=अथवा। च्युतकेशरदूषितेक्षणानि—च्युताश्च ते केशराः च्युतकेशराः, दूषिते ईक्षणे येषु तानि दूषितेक्षणानि च्युतकेशरे दूषितेक्षणानि येषु तानि=परिभृष्टकिञ्जल्कदूषितनेत्राणि ('किञ्जल्कः केशरोऽस्त्रियाम्' इत्यमरः)। अवतंसोत्पलताडनानि—अवतंसस्य उत्पलानि, अवतंसोत्पलानि, तैः ताडनानि, तानि=कर्णपूराभूषणोत्पलप्रहारान् च स्मरसि=स्मरणं करोषि।

सरलार्थः—हे मन्मथ! नामस्खलितेषु काञ्चीसूत्रैः मया कृतं बन्धनं स्मरसि, अथवा भृष्टकिञ्जल्कदूषितनेत्राणि कर्णपूरोत्पलप्रहारांश्च स्मरसि।

SriVidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

हिन्दी—हे मदन ! सपत्नियों के नामोच्चारणादि सुनकर क्रोध से काञ्ची (करधनी) मेरे द्वारा बन्धन किये जाने की बात को याद कर रुष्ट हो गये हो अथवा गिरे हुए केशररज से दूषित आँखों और कर्णपूर (आभूषण) कमल के प्रहारों का स्मरण कर मेरे अपराध के कारण दर्शन नहीं दे रहे हो ॥ ८ ॥

हृदये वससीति मत्प्रियं यदवोचस्तदवैमि कैतवम् ।
उपचारपदं न चेदिदं त्वमनङ्गः कथमक्षता रतिः ॥९॥

अन्वयः— हृदये वससि इति मत्प्रियं यत् अवोचः तत् कैतवम् अवैमि, इदम् उपचारपदं न चेत् त्वम् अनङ्गः कथं रतिः अक्षता ।

व्याख्या-हृदय इति । हृदये=चेतसि । वससि=वासं करोषि । इति=एवम् । मत्प्रियम्=मम प्रियं, तत् मम वल्लभम् यद् अवोचः=अकथयः तत् कथनं कैतवम्=दम्भपूर्णम् ('कपटोऽस्त्री दम्भोपधयश्छद्मकैतवे ।' 'कुसृतिर्निकृतिः शास्त्रम्' इत्यमरः) । अवैमि=वेद्मि । इदम्=एतत् । उपचारपदम्–उपचारस्य पदम् उपचारपदम्=रञ्जनार्थमसत्यभाषणम् । न चेत्=न यदि । त्वम्=भवान् । अनङ्गः= अशरीरः । कथं= केन प्रकारेण । रतिः=कामप्रियाऽहम् । अक्षता–न क्षता अक्षता=अविनष्टा जाता ।

सरलार्थः—'अहं सदा तव चेतसि वसामि' यद् त्वमकथयस्तच्छद्मपूर्णं वेद्मि । एतत्परस्य रञ्जनार्थमसत्यभाषणं यदि नास्ति तर्हि अशरीरे त्वयि रतिरहमविनष्टा कथं स्याम् ।

हिन्दी—आप कहा करते थे कि 'मैं तो तुम्हारे हृदय में ही रहता हूँ" मेरी समझ से आप का यह कथन छलपूर्ण था । यह असत्य भाषण केवल दूसरों को प्रसन्न करने के लिए ही था, नहीं तो तुम्हारे भस्म हो जाने पर मुझ रति की अक्षता (नष्ट न होना) कैसे रह सकती है ? ॥ ९ ॥

परलोकनवप्रवासिनः प्रतिपत्स्ये पदवीमहं तव ।
विधिना जन एष वञ्चितस्त्वदधीनं खलु देहिनां सुखम् ॥१०॥

अन्वयः—परलोकनवप्रवासिनः तव पदवीं प्रतिपत्स्ये, विधिना एष जनः-वञ्चितः देहिनां सुखं त्वदधीनं खलु ।

व्याख्या—परलोकेति । परलोकनवप्रवासिनः—परश्चासौ लोकः परलोकः, प्रवासः अस्यास्तीति प्रवासी, नवश्चासौ प्रवासी, नवप्रवासी, परलोकस्य

Sri Vidyabharathi Book Centre, Shingeri

CC-O. In Public Domain. Digitized by eGangotri

नवप्रवासी इति तस्य = स्वर्गाभिनवप्रवासिनः । तव = ते । पदवीं = पदं मार्गं वा । प्रतिपत्स्ये = आश्रयिष्ये । विधिना=भाग्येन ('दैवं दिष्टं भागधेयं भाग्यं स्त्री नियतिर्विधिः' इत्यमरः) । एषः जनः=इयमहं रतिः । वञ्चितः=छलितः । देहिनां=शरीरधारिणां प्राणिनाम् । सुखम्=आनन्दम् । त्वदधीनं-त्वयि अधीनं त्वदधीनं = तवायत्तम् खलु=किल ('अधीनो निघ्न आयत्त' इत्यमरः) । अत्रार्थान्तरन्यासोऽलंकारः ।

सरलार्थः—(हे नाथ !) स्वर्गाभिनवप्रवासिनः तव मार्गमहमाश्रयिष्ये । भाग्येनाहं त्वया वञ्चिताऽस्मि । देहिनामानन्दं नूनं तवाश्रितमिति प्रसिद्धम् ।

हिन्दी—हे नाथ ! स्वर्ग के अभिनव प्रवासी आपके मार्ग का आश्रय लूंगी । भाग्य ने मुझे तुम से वञ्चित किया है । सभी प्राणियों का सुख वास्तव में तुम्हारे ही अधीन है । १० ॥

रजनीतिमिरावगुण्ठिते पुरमार्गे घनशब्दविक्लवाः ।
वसतिं प्रिय ! कामिनां प्रियास्त्वदृते प्रापयितुं क ईश्वरः ॥११॥

अन्वयः—(हे प्रिय !) रजनीतिमिरावगुण्ठिते पुरमार्गे घनशब्दविक्लवाः प्रियाः कामिनां वसतिं प्रापयितुं त्वदृते कः ईश्वरः (अस्ति) ।

व्याख्या—रजनीति । हे प्रिय = अयि जीवितेश्वर ! रजनीतिमिरावगुण्ठिते—रजन्याः तिमिरं रजनीतिमिरं तेनावगुण्ठितस्तस्मिन् = निशान्धकारावृते ('अन्धकारोऽस्त्रियां ध्वान्तं तमिस्रं तिमिरं तमः' इत्यमरः) ('विभावरी तमस्विन्यौ रजनी यामिनी तमी' इत्यमरः) । पुरमार्गे—पुरस्य मार्गे = नगरवर्त्मनि । घनशब्दविक्लवाः—घनानां शब्दाः घनशब्दास्तैर्विक्लवाः = मेघगर्जनव्याकुलाः ('घनजीमूतमुदिरजलमुग्धूमयोनयः' इत्यमरः) । प्रियाः=प्रेयसीः । कामिनां=प्रियतमानां । वसतिं=वासस्थानम् । प्रापयितुं=गमयितुम् । त्वदृते = त्वया विना, कः ईश्वरः=कः समर्थः, अर्थात् कोऽपि समर्थः नास्ति ।

सरलार्थः—हे नाथ ! रात्र्यन्धकारावृते पुरवर्त्मनि मेघगर्जनव्याकुलाः प्रियाः प्रियतमवासस्थानं प्रापयितुं त्वया विना कोऽपि सक्षमः नास्ति ।

हिन्दी—हे प्रियतम ! रात्रि के अन्धकार से घिरे नगर मार्ग पर मेघों की गर्जन (गड़गड़ाहट) से व्याकुल प्रेयसियों को प्रेमियों के निवास पर तुम्हारे सिवाय और कोई नहीं पहुंचा सकता है ॥ ११ ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

नयनान्यरुणानि घूर्णयन् वचनानि स्खलयन् पदे पदे ।
असति त्वयि वारुणीमदः प्रमदानामधुना विडम्बना ॥१२॥

अन्वयः—अरुणानि नयनानि घूर्णयन् पदे पदे वचनानि स्खलयन् प्रमदानां वारुणीमदः अधुना त्वयि असति विडम्बना ।

व्याख्या—नयनानीति । अरुणानि=रक्तवर्णानि । नयनानि=लोचनानि । घूर्णयन्=भ्रामयन् । पदे पदे=प्रतिपदम् । वचनानि=वचांसि ('व्यवहार उक्तिर्लपितं भाषितं वचनं वचः' । इत्यमरः) । स्खलयन्=स्खलितानि कुर्वन् । प्रमदानां=कामिनीनां । वारुणीमदः—वरुणस्येयं वारुणी, तस्याः मदः=सुरामदः । अधुना=साम्प्रतम् । त्वयि=भवति । असति=अविद्यमाने । विडम्बना=अनुकृतिमात्रमस्ति ।

सरलार्थः—रक्तनेत्राणि चालयन् प्रतिपदं वचांसि स्खलितानि कुर्वन् कामिनीनां सुरामदः सम्प्रति अनुकृतिमात्रमस्ति ।

हिन्दी—अरुणनयनों को चलाने वाला तथा कदम-कदम पर जवान को लड़खड़ानेवाला कामनियों का सुरामद अब तुम्हारे बिना उपहासमात्र ही है ।

कामेन विना चन्द्रस्य शोच्यत्वमाह —

अवगम्य कथीकृतं वपुः प्रियबन्धोस्तव निष्फलोदयः ।
बहुलेऽपि गते निशाकरस्तनुतां दुःखमनङ्ग ! मोक्ष्यति ॥१३॥

अन्वयः—हे अनङ्ग ! प्रियबन्धोः तव वपुः कथीकृतम् अवगम्य निष्फलोदयः निशाकरः बहुले गते अपि तनुतां दुःखं मोक्ष्यति ।

व्याख्या—अवगम्येति । हे अनङ्ग—अविद्यमानमङ्गं यस्य सः, तत्सम्बुद्धौ=हे शरीररहितकाम ! प्रियबन्धोः—प्रियाः बान्धवाः यस्य सः, तस्य=प्रियसुहृदः । तव=ते मदनस्य । वपुः=शरीरम् ('गात्रं वपुः संहननं शरीरं वर्ष्म विग्रहः' इत्यमरः) । कथीकृतम्—अकथा कथा यथा सम्पद्यते तथा कृतम् तत्=कथनमात्रावशिष्टम् । अवगम्य=विज्ञाय । निष्फलोदयः—निष्फलः उदय यस्य सः=विफलाविर्भावः । निशाकरः=रजनीशः ('द्विजराजः शशधरः नक्षत्रेशः क्षपाकरः' इत्यमरः) । बहुले=कृष्णपक्षे । गते=समाप्तौ । तनुतां=क्षीणताम् । दुःखं=कष्टम् । मोक्ष्यति=त्यक्ष्यति ।

सरलार्थः—हे अनङ्ग ! प्रियमित्रस्य तव शरीरं कथनमात्रावशिष्टं विज्ञाय विफलाविर्भावश्चन्द्रः कृष्णपक्षे गतेऽपि क्षीणतां कष्टं त्यक्ष्यति ।

Sri Vidyabharati Book Centre Sitamarhi

CC-O. In Public Domain. Digitized by eGangotri

हिन्दी—हे अनङ्ग ! प्रियसखा आप का शरीर नाममात्र (कथामात्र) जान कर व्यर्थ उदयवाला चन्द्रमा कृष्णपक्ष के समाप्त हो जाने पर भी अपनी क्षीणता बड़े कष्ट से छोड़ पायेगा (अर्थात् कठिनाई से पुष्ट हो सकेगा-) ।१३।

हरितारुणचारुबन्धनः कलपुंस्कोकिलशब्दसूचितः ।
वद सम्प्रति कस्य बाणतां नवचूतप्रसवो गमिष्यति ।।१४।।

अन्वयः—हरितारुणचारुबन्धनः कलपुंस्कोकिल शब्द सूचितः नवचूत-प्रसवः सम्प्रति कस्यपाणतां गमिष्यति ? वद ।

व्याख्या-हरितेति । हरितारुणचारुबन्धनः—हरितश्चारुणश्च हरितारुणम्, तच्चारु बन्धनं यस्य सः=पलाशरक्तरुचिरबन्धनः । कलपुंस्कोकिलशब्दसूचितः—पुमांश्चासौ कोकिलः पुंस्कोकिलः, तस्य शब्दः पुंस्कोकिलशब्दः, कलश्चासौ पुंस्कोकिलशब्द इति, तेन सूचितः=मधुरकोकिलकूजनतर्कितः । नवचूत प्रसवः—नवानां=नूतनानाम् चूतानाम्=आम्रमञ्जरीणां प्रसवः=उत्पत्तिः ('आम्रश्चूतो रसालोऽसौ' इत्यमरः) । सम्प्रति=साम्प्रतम् । कस्य=त्वया विना कस्य जनस्य । बाणतां=शरलक्ष्यताम् । गमिष्यति=यास्यति । वद=कथय ?

सरलार्थः—(हे कुसुमायुध !) मधुरकोकिलकूजनश्रवणानुमितोदयं, नीलारुणमनोरमवृन्तं नवरसालकुसुमं सम्प्रति त्वयि मृते सति करशरलक्ष्यं भविष्यति, कथय ।

हिन्दी—(हे कुसुमायुध !) पलाश का अरुण रुचिर बन्धन, मधुर कोयल के कूजन से वसन्तागमन की सूचना, नीले व लाल बन्धन वाली नूतन आम्र-मञ्जरी अब तुम्हारे परलोकगामी होने पर किस के बाण का निशान बनेंगे ।। १४ ।।

अलिपङ्क्तिरनेकशस्त्वया गुणकृत्ये धनुषो नियोजिता ।
विरुतैः करुणस्वनैरियं गुरुशोकामनुरोदितीव माम् ।।१५।।

अन्वयः—त्वया अनेकशः धनुषः गुणकृत्ये नियोजिता इयम् अलिपंक्तिः करुणस्वनैः विरुतैः गुरुशोकां माम् अनुरोदिति इव ।

व्याख्या—अलिपंक्तिरिति । त्वया=भवता । अनेकशः=भूयसः । धनुषः=कार्मुकस्य । गुणकृत्ये=मौर्विकर्मणि । नियोजिता=प्रविकृता । इयम्=एषा ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

अलिपंक्तिः—अलीनां = भ्रमराणां पंक्तिः = माला ('वीप्यालिरावलिः पंक्तिः' इत्यमरः) ('गुणो मौर्व्यप्रधानयोः' इत्यमरः)। करुणस्वनैः—करुणाः स्वनाः येषु तानि करुणस्वनानि, तैः कातरध्वनिभिः। विरुतैः=कूजितैः। गुरुशोकां—गुरुः=महान् शोकः=क्लेशः यस्याः सा, ताम्। माम्=रतिम्। अनुरोदिति इव= अनुशोचतीव। अत्रोत्प्रेक्षालङ्कारः।

सरलार्थः—(हे प्रिय !) बहुषु कार्येषु त्वया वारं वारं पुष्पधनुर्मौर्वीकार्ये भ्रमरमालानियोजिता सैवाद्य त्वया विना कातरध्वनिभिः विरुतैरतिदुखिनीं मामनुशोचतीव।

हिन्दी—(हे प्रिय !) तुम ने अनेकों बार धनुष की प्रत्यञ्चा के कार्य (पुष्पधनुष की डोरी पर चढ़ाने में) जिस भ्रमर पंक्ति को नियोजित किया वही (तुम्हारे बिना आज) भ्रमर पंक्ति कातरस्वर से मानो रोकर अतिशोकाकुला मेरा अनुकरण कर रही है ॥ १५ ॥

प्रतिपद्य मनोहरं वपुः पुनरप्यादिश तावदुत्थितः।
रतिदूतिपदेषु कोकिलां मधुरालापनिसर्गपण्डिताम् ॥१६॥

अन्वयः—तावत् पुनः अपि मनोहरं वपुः प्रतिपद्य उत्थितः सन् मधुरालापनिसर्गपण्डितां कोकिलां रतिदूतिपदेषु आदिश।

व्याख्या—प्रतिपद्येति। तावत् = तावत्कालम्। पुनः=भूयः अपि। मनोहरम्=सुन्दरम्। वपुः = शरीरम्। प्रतिपद्य=प्राप्य। उत्थितः = उद्गतः सन्। मधुरालापनिसर्गपण्डिताम्—मधुराश्च ते आलापाः मधुरालापाः, मधुरालापेषु पण्डिता या सा, तादृशीम्। ('स्यादाभाषणमालापः' इत्यमरः)। कोकिलाम्= परभृतिकाम्। रतिदूतपदेषु—रतेः दूती रतिदूती, तस्याः पदानि रतिदूतीपदानि, तेषु=सुरतदूतीकार्येषु। आदिश=आज्ञापय।

सरलार्थः—हे स्मर ! भस्मीभूतं शरीरमिदं विहाय पूर्ववदपि सुन्दरं शरीरं गृहीत्वा कामिनीकामुकयोः स्त्रीपुरुषयोः परस्परं संघटनरूपकार्येषु प्रकृत्या प्रवीणां पिकीमादिश।

हिन्दी—हे नाथ ! भस्मीभूत इस शरीर को त्यागकर पूर्ववत् सुन्दर शरीर धारण कर कामिनी तथा कामी स्त्री-पुरुषों के पारस्परिक मिलन कार्य में स्वभावतः दक्ष मधुरभाषिणी कोयल को आदेश दीजिए ॥ १६ ॥

Sri Vidyabharati Book Centre, Siliguri

CC-O. In Public Domain. Digitized by eGangotri

शिरसा प्रणिपत्य याचितान्युपगूढानि सवेपथूनि च।
सुरतानि च तानि ते रहः स्मर ! संस्मृत्य न शान्तिरस्ति मे ॥१७॥

अन्वयः—हे स्मर ! ते शिरसा प्रणिपत्य याचितानि सवेपथूनि उपगूढानि च तानि रहः सुरतानि च संस्मृत्य मे शान्तिः न अस्ति।

व्याख्या शिरसेति। हे स्मर=हे मदन ! ते=तव। शिरसा=उत्तमाङ्गेन। प्रणिपत्य=प्रणम्य। याचितानि=प्रार्थितानि। सवेपथूनि—वेपथुना सहितानि=सकम्पानि। उपगूढानि=आलिङ्गितानि च। तानि = अनुभूतानि। रहः = एकान्तम्। सुरतानि=मैथुनानि च। संस्मृत्य=स्मृत्वा। मे=मम। शान्तिः=शमः न अस्ति=न भवति।

सरलार्थः—हे स्मर ! एकान्ते प्रणयकुपितां मानिनीं मामनुनेतुमादौ मम पादयोः पतित्वा त्वया कृतं याचनानन्तरं मयि प्रसन्नायां प्रेम्णा कृतस्य तवालिङ्गनस्य, तदनन्तरं रागस्य समुद्बोधे सति त्वया कृतानि बहुविधसुरतानि स्मृत्वा मां शान्तिर्भवति।

हिन्दी—हे काम ! एकान्त में प्रणय से कुपित मुझ मानिनी का अनुनय करने के लिए आरम्भ में तुम्हारे द्वारा मेरे पाँवों पड़कर की गई याचना के पश्चात् मेरे प्रसन्न होने पर प्रेम से तुम्हारा आलिङ्गन किये हुए, तदनन्तर अनुराग का उद्बोध होने पर तुम्हारे द्वारा किये गये अनेक प्रकार के सुरतों का स्मरण कर मुझे शान्ति मिलती है ॥ १७ ॥

रचितं रतिपण्डित ! त्वया स्वयमङ्गेषु ममेदमार्तवम्।
ध्रियते कुसुमप्रसाधनं तव तच्चारु वपुर्न दृश्यते ॥१८॥

अन्वयः—हे रतिपण्डित ! त्वया मम अंगेषु स्वयं रचितम् आर्तवं कुसुमप्रसाधनम् इदं ध्रियते तव तत् चारु वपुः न दृश्यते।

व्याख्या—रचितमिति। हे रतिपण्डित-रतौ=रतिक्रीडायां पण्डितः=निपुणः, तत्सम्बुद्धौ=हे रतिदक्ष ! त्वया=भवता। मम=मे। अङ्गेषु=शरीरावयवेषु। स्वयम् = आत्मना। रचितं = कृतम्। आर्तवम्—ऋतुरस्य प्राप्तमार्तवम्=ऋतुजातम्। कुसुमप्रसाधनम्-कुसुमानां = पुष्पाणां प्रसाधनम् = आभरणम्। इदम्=एतत्। ध्रियते=धारयते। तव=ते। तत्=उक्तविधम्। चारु=

Sri Vidyabharati Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

सुन्दरम् । वपुः=शरीरम् ('सुन्दरं रुचिरं चारु सुषमं साधु शोभनम्' इत्यमरः) । न दृश्यते = नैवावलोक्यते ।

सरलार्थः—हे रतिक्रीडाकुशल ! भवता ममाङ्गेषु स्वयं कृतमृतु प्रभवं कुसुमाभरणमिदं ध्रियते, ते पूर्वोक्तं रुचिरं शरीरं नावलोक्यते ।

हिन्दी—हे रतिपण्डित ! तुम्हारे द्वारा मेरे अङ्गों पर स्वयम् अपने हाथ से किया हुआ वसन्त ऋतु के पुष्पों का यह आभरण अभी तक ज्यों का त्यों बना है परन्तु तुम्हारा पूर्वोक्त रुचिर शरीर नहीं दिखाई दे रहा है ॥ १८ ॥

विबुधैरसि यस्य दारुणैरसमाप्ते परिकर्मणि स्मृतः ।
तमिमं कुरु दक्षिणेतरं चरणं निर्मितरागमेहि मे ॥१९॥

अन्वयः—दारुणैः विबुधैः यस्य परिकर्मणि असमाप्ते स्मृतः असि, तम् इमं दक्षिणेतरं मे चरणं निर्मितरागं कुरु, एहि ।

व्याख्या— विबुधैरिति । दारुणैः = कठोरैः ('दारुणं भीषणं भीष्मं भीमं घोरं भयानकम्' इत्यमरः) । विबुधैः = सुरैः ('अमरा निर्जरा देवास्त्रिदशाः विबुधाः सुराः' इत्यमरः) । यस्य=मम चरणस्य । परिकर्मणि=प्रसाधने ('परिकर्म प्रसाधनम्' इत्यमरः) । असमाप्ते–न समाप्तमसमाप्तं, तस्मिन्=अनवसिते सति । स्मृतः=स्मृतिपथं नीतः असि । तम्=तथाविधम् । इमम्=पुरोवर्तिनम् । दक्षिणेतरं=वामम् । मे=मम । चरणं=पादम् । निर्मितरागं—रज्यते अनेन इति रागः, निर्मितरागः यस्मिंस्तत्=कृतालक्तकम् । कुरु = विधेहि । एहि=आगच्छ ।

सरलार्थः—हे प्रियतम, मम चरणयोरलक्तकरञ्जनकार्येऽसमाप्ते सत्येव मध्ये दारुणैर्देवैः स्मृतो भवान् गतः । अतोऽत्रागच्छ मम दक्षिणेतरवामचरणमप्यलक्तकेन रञ्जयेति भावः ।

हिन्दी—हे प्रियतम, मेरे चरणों को (अलक्तक से) रंगने का कार्य बिना समाप्त किये मध्य में ही दारुण देवों द्वारा स्मरण किये गये आप चले गये । अतः मेरे दक्षिणेतर वाम चरण को भी अलक्तक से रंग दीजिए, यहाँ आइए ॥ १९ ॥

अहमेत्य पतङ्गवर्त्मना पुनरङ्काश्रयणी भवामि ते ।
चतुरैः सुरकामिनीजनैः प्रिय ! यावन्न विलोक्यसे दिवि ॥२०॥

Sri Vidyabharati Book Centre, Delhi

CC-O. In Public Domain. Digitized by eGangotri

अन्वयः-अहं पतङ्गवर्त्मना एत्य पुनः ते अङ्काश्रयणी भवामि। हे प्रिय ! दिवि चतुरैः सुरकामिनीजनैः यावत् न विलोक्यसे।

व्याख्या—अहमिति। अहम् = रतिः। पतङ्गवर्त्मना--पतङ्गस्य वर्त्म, तेन = शलभपथेन, अग्निप्रवेशेन (पतङ्गः शलभे चाग्नौ मार्जारेऽर्के शरे खगे।' इत्यमरः)। एत्य = आगत्य। पुनः = भूयः। ते = तव। अङ्काश्रयणी—अङ्कमाश्रयतीत्यङ्काश्रयणी=क्रीडावलम्बिनी ('उत्सङ्गश्चिह्नयोरङ्कः' इत्यमरः)। भवामि। हे प्रिय ! दिवि=स्वर्गे। चतुरैः = निपुणैः। सुरकामिनीजनैः = देवाङ्गनाभिः। यावत् = यावत्कालम्। न विलोक्यते = नैव विलोकयिष्यसे।

सरलार्थः—हे प्रियतम ! दिवि पुरुषचित्ताकर्षकाः अप्सरसः यावत्त्वां न वशीकुर्वन्ति तावदहं पतङ्गमार्गेणाग्निप्रवेशेन द्रुत तव पार्श्वमेत्य प्रागेव तव क्रोडाश्रयणी भविष्यामि।

हिन्दी—हे प्रियतम ! स्वर्ग में पुरुषों का चित्त आकृष्ट करने वाली अप्सरायें जब तक तुम्हें अपने वश में नहीं कर लेती हैं, उससे पूर्व ही मैं तुम्हारी गोद में आकर बैठ जाऊँगी ॥ २० ॥

मदनेन विनाकृता रतिः क्षणमात्रं किल जीवितेति मे।
वचनीयमिदं व्यवस्थितं रमण ! त्वामनुयामि यद्यपि ॥२१॥

अन्वयः--हे रमण ! त्वाम् अनुयामि, यद्यपि किन्तु रतिः मदनेन विनाकृता क्षणमात्रं जीविता किल इति इदं वचनीयं मे व्यवस्थितम्।

व्याख्या—मदनेनेति। हे रमण = हे कान्त ! त्वाम्=भवन्तम्। अनुयामि= अनुसरामि। यद्यपि। किन्तु = परन्तु। रतिः=तव प्रिया। मदनेन = कामेन, त्वया। विनाकृता = रहिता। क्षणमात्रं = निमिषमात्रं। जीविता = सजीवा। किल = खलु। इति=एवम्। इदम्=एतद्। वचनीयम्=लोकापवादः। मे=मम। व्यवस्थितम्=स्थिरमजायत।

सरलार्थः—हे प्रियतम ! यद्यपि सुनिश्चितमिदं यदहं भवद्विना मरिष्यामि, तथापि जगति लोकापवादोऽयं शिलालिखित इव स्थिरः अभवत्।

हिन्दी--हे प्रियतम ! यद्यपि यह निश्चित ही है कि मैं भी शीघ्र ही तुम्हारा अनुगमन करूँगी फिर भी यह लोकापवाद शिलालेख जैसा स्थिर हो गया है ॥ २१ ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

क्रियतां कथमन्त्यमण्डनं परलोकान्तरितस्य ते मया ।
सममेव गतोऽस्य तर्कितां गतिमङ्गेन च जीवितेन च ॥२२॥

अन्वयः-परलोकान्तरितस्य ते मया अन्त्यमण्डनं कथं क्रियताम् ? अङ्गेन । जीवितेन च समम् एव अतर्कितां गतिं गतः असि ।

व्याख्या--क्रियतामिति । परलोकान्तरितस्य—परश्चासौ लोकः परलोकः, अन्तरं सञ्जातं अस्य आन्तरितः,परलोकेनान्तरितस्तस्य=परलोकं गतस्य,मृतस्य । ते=तव । मया=रत्या । अन्त्यमण्डनम् —अन्त्यम्=अन्तिमम् मण्डनम्=अलङ्करणं, तत् कथं=केन प्रकारेण । क्रियतां=विधीयताम् । अङ्गेन=शरीरेण । जीवितेन= जीवनधारणेन च । समम् एव = साकमेव । अतर्कितां गतिम् = अविचारितां स्थितम् । गतः = प्रयातः असि ।

सरलार्थः —(हे प्रिय !) परलोकं गतस्य तव मृतशरीरालङ्करणमपि मया कथं कार्यम् । यतः सर्वेषां मृतानां विनिर्गतेषु प्राणेषु केवलं शरीरं तत्र तिष्ठति । त्वं तु शरीरप्राणैः सह एव विनष्टः अतः अन्त्यमण्डनस्यावकाश एव नास्ति ।

हिन्दी—हे प्रिय ! परलोक को गये हुए तुम्हारे मृतशरीर को मैं किस प्रकार सजा सकती हूँ । क्योंकि सभी मृतजीवों के प्राण निकल जाने पर केवल शरीर ही वहाँ रह जाता है । परन्तु तुम तो शरीर तथा प्राण दोनों के साथ नष्ट हुए हो अतः तुम्हारा अन्तिम अलङ्करण (सजावट) का अवसर ही नहीं हैं ॥ २२ ॥

ऋजुतां नयतः स्मरामि ते शरमुत्सङ्गनिषण्णधन्वनः ।
मधुना सह सस्मितां कथां नयनोपान्तविलोकितं च यत् ॥२३॥

अन्वयः—शरम् ऋजुतां नयतः उत्सङ्गनिषण्णधन्वनः ते मधुना सह सस्मितां कथां, यत् नयनोपान्तविलोकितं च (तत्) स्मरामि ।

व्याख्या—ऋजुतामिति । शरम् = सायकम् । ऋजुतां = कोमलताम् । नयतः=प्रापयतः । उत्सङ्गनिषण्णधन्वनः--उत्सङ्गे = क्रोडे निषण्णं = धृतं धनुर्यस्य सः, तस्य । ते=तव । मधुना सह=वसन्तेन साकम् ('मधुर्दैत्ये वसन्ते च चैत्रे च' इति विश्वः) । सस्मितां—स्मितेन सहिता सस्मिता, ताम्=मन्दहसिताम् । कथां=वार्त्ताम् । यत् नयनोपान्तविलोकितम्—नयनयोः उपान्तौ, ताभ्यां विलोकितम् तत् तेन [illegible] स्मरामि=चिन्तयामि ।

SGDF Vidyabharati Foundation Chennai and eGangotri

CC-O. In Public Domain. Digitized by eGangotri

सरलार्थः--हे प्राणनाथ ! बाणं कोमलतां प्रापयतः क्रोडधृतधनुषस्तव वसन्तेन साकम् । सस्मिताम् मन्दहासयुक्तां वार्ता यत् नयनोपान्तविलोकितं तस्य च स्मरणं करोमि ।

हिन्दी—बाणों की वक्रता दूर करते हुए, गोद में धनुष रखे हुए तुम्हारी (कामदेव की) वसन्त के साथ मन्दहासपूर्ण वार्ता का और नत्रों के दोनों छोरों से देखने वाली बात का मैं स्मरण करती हूं ॥ २३ ॥

अथ प्रियतमस्य सहचरं वसन्तमुद्दिश्य रत्याः प्रलापः--

क्व नु ते हृदयङ्गमः सखा कुसुमायोजितकार्मुको मधुः ।
न खलूग्ररुषा पिनाकिना गमितः सोऽपि सुहृद्गतां गतिम् ॥२४॥

अन्वयः--हृदयंगमः ते सखा कुसुमायोजित कार्मुकः मधुः क्व नु, सः अपि उग्ररुषा पिनाकिना सुहृद्गतां गतिं न गमितः खलु ।

व्याख्या--क्व न्विति । हृदयंगमः--हृदयं गच्छतीति हृदयंगमः=हृद्यः । ते=तव कामस्य । सखा=वयस्यः । कुसुमायोजितकार्मुकः--कुसुमैः=पुष्पैः आयोजितं=रचितं कार्मुकं=धनुर्येन सः । मधुः=वसन्तः । क्व नु=कुत्र खलु गतः । सः=वसन्तः अपि । उग्ररुषा-उग्रं=तीक्ष्णंरुट्=कोपं यस्य सः तेन । ('कोपक्रोधामर्षरोषप्रतिघारुट्क्रुधौ स्त्रियौ' इत्यमरः) । पिनाकिना=पिनाकमस्यास्तीति पिनाकी, तेन=धनुर्धारिणा शिवेन ('मृत्युञ्जयः कृत्तिवासः पिनाकी प्रथमाधिपः' इत्यमरः) । सुहृद्गतां=मित्रप्राप्तां, कामप्राप्तां वा । गतिम्=अवस्थाम्, भस्मत्वमित्याशयः । न गमिताः=न प्रापितः खलु किल ।

सरलार्थः-(हे प्रिये) हृद्यस्ते सखा कुसुमैः रचित धन्वा वसन्तः कुत्र गतः ? (अथवा) असौ वसन्तः अपि महेश्वरेणोग्रक्रुद्धेन मित्रप्राप्तां भस्मत्वगतिं न प्रापितः किल ॥ २४ ॥

हिन्दी—(हे प्रिय !) तुम्हारे हृदयङ्गम मित्र, पुष्पों का धनुष बनाये वसन्त कहाँ गये ? अथवा वह भी उग्र क्रोधी पिनाकी शिवजी के द्वारा मित्र (काम) को प्राप्त भस्मत्वदशा को तो नहीं प्राप्त हो गये ? ॥ २४ ॥

अथ तैः परिदेविताक्षरैर्हृदये दिग्धशरैरिवाहतः ।
रतिमभ्युपपत्तुमातुरां मधुरात्मानमदर्शयत्पुरः ॥२५॥

अन्वयः—अथ तैः परिदेविताक्षरैः हृदये दिग्धशरैः इव आहतः मधुः आतुरां रतिम् अभ्युपपत्तुम् आत्मानं पुरः अदर्शयत् ।

Sri Vidyabharathi Book Centre, Singeri

CC-O. In Public Domain. Digitized by eGangotri

व्याख्या—अथेति। अथ=अनन्तरम्। तैः=तथाविधैः। परिदेवितास्रैः—परिदेवितस्य = विलापस्याक्षराणि = वर्णास्तैः = विलपनैः। हृदये = चेतसि। दिग्धशरैः—दिग्धाश्च ते शरा, दिग्धशरास्तैः = विषाक्तबाणैः ('विषाक्ते दिग्धलिप्तकौ' इत्यमरः) इव = यथा। आवृतः = ताडितः। मधुः = वसन्तः। आतुराम् = आकुलिताम्। रतिम् = कामपत्नीम्। अभ्युपपत्तुम्=अनुग्रहीतुम्। आत्मानम्=स्वम्। पुरः=समक्षम्। अदर्शयत्=दर्शयामास। अत्रोत्प्रेक्षालङ्कारः।

सरलार्थः— तदनन्तरं विलापवचोभिः हृदये विषाक्तबाणैराहत इव वसन्तो व्याकुलितां रतिमात्मानम् समक्षं दर्शयामास।

हिन्दी—तदनन्तर पूर्वोक्त विलापाक्षरों के विषाक्तबाणों से हृदय में आहत जैसे वसन्त ने आकुलित कामपत्नी रति को अपना शरीर उसके समक्ष दिखलाया ॥ २५ ॥

तमवेक्ष्य रुरोद सा भृशं स्तनसम्बाधमुरो जघान च।
स्वजनस्य हि दुःखमग्रतो विवृतद्वारमिवोपजायते ॥२६॥

अन्वयः—सा तम् अवेक्ष्य भृशं रुरोद, स्तनसम्बाधम् उरो जघान च, हि स्वजनस्य अग्रतः दुःखं विवृतद्वारम् इव उपजायते।

व्याख्या—तामिति। सा=रतिः। तम् = वसन्तम्। अवेक्ष्य = दृष्ट्वा। भृशम्=अत्यन्तम्। रुरोद=रुदनं चकार। स्तनसम्बाधम् = स्तनौ सम्बाध्य इति स्तनसम्बाधम्=पयोधरसम्बाधम्। उरः = वक्षः। जघान=अताडयत्। च। हिः=यतः। स्वजनस्य=आत्मसम्बन्धिनो जनस्य। अग्रतः = पुरतः। दुःखम्=क्लेशम्। विवृतद्वारम् इव—विवृतं द्वारं यस्य तत्=अनावृतकपाटमिव। उपजायते=भवतीति।

सरलार्थः—रतिर्वसन्तमवलोक्योरस्ताडयन्ती अधिकं रुरोद। आत्मीयजनसमक्षं दुःखमन्तःभागे निरुद्ध वस्तु यथा द्वारे विघटिते वेगेन बहिर्निर्गच्छति तथैवाधिकं बहिः प्रसरति।

हिन्दी—रति वसन्त को देखकर जोर से रोने लगी तथा छाती पीटने लगी; क्योंकि मनुष्य अपने प्रियजन को सामने देखकर उसी प्रकार अधिक दुःख प्रकट करता है जैसे कि अवरुद्ध पदार्थ मार्ग पाकर जोर से निकलने लगता है ॥ २६ ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

इति चैनमुवाच दुःखिता सुहृदः पश्य वसन्त ! किं स्थितम् ? ।
तदिदं कणशो विकीर्यते पवनैर्भस्म कपोतकर्बुरम् ॥२७॥

अन्वयः— दुःखिता सा एनम् इति उवाच—हे वसन्त ! पश्य, सुहृदः किं स्थितम् ? तत् इदं कपोतकर्बुरं भस्म पवनैः कणशः विकीर्यते ।

व्याख्या—इति चैनमिति । दुःखिता = शोकाकुला । सा=कामपत्नी रतिः । एनम्=अमुं वसन्तम् । इति=इत्थम् । उवाच=बभाण । हे वसन्त=अयि मधो ! पश्य=अवलोकय । सुहृदः शोभनं हृदयं यस्य स सुहृत्, तस्य=मित्रस्य कामस्य । किं स्थितम्=किमुपस्थितम् । तत् इदम्=एतत् । कपोतकर्बुरं—कपोत इव कर्बुरं तत्=पारावतशबलम् ('पारावतः कलरवः कपोतः' इत्यमरः) । ('चित्रं किर्मीर-कल्माषशबलैताश्च कर्बुरे' इत्यमरः) । भस्म=भूतिः (भस्मभूतिर्भसितभस्मनी' इत्यमरः) । पवनैः=वायुभिः ('नभस्वद्वातपवनः पवमानः प्रभञ्जनः' इत्यमरः) । कणशः=लवशः । विकीर्यते = विक्षिप्यते । अत्रोपमालङ्कारः ।

सरलार्थः—आकुलिता रतिर्वसन्तमाह—हे वसन्त ! पश्य, तव सुहृदः कामस्य किमुपस्थितम् ? तव मित्रस्येदं भस्म पारावत इव कर्बुरवर्णं वातैः लवशः विक्षिप्यते ।

हिन्दी—अत्यन्त शोकाकुल रति वसन्त से कहने लगी—हे वसन्त ! देखो, तुम्हारे मित्र मदन की कैसी दशा हो गई है ? उनकी यह कबूतर के पंखसदृश वर्णवाली भस्म वायु इधर-उधर उड़ाकर बिखेर रहा है ॥ २७ ॥

अयि सम्प्रति देहि दर्शनं स्मर ! पर्युत्सुक एष माधवः ।
दयितास्वनवस्थितं नृणां न खलु प्रेम चलं सुहृज्जने ॥२८॥

अन्वयः—अयि स्मर ! सम्प्रति दर्शनं देहि, एष माधवः पर्युत्सुकः अस्ति, नृणां दयितासु प्रेम अनवस्थितं, सुहृज्जने (प्रेम) खलु चलं न ।

व्याख्या—अयीति । अयि स्मर=भोः काम ! सम्प्रति=साम्प्रतम् । दर्शनं=विलोकनम् । देहि=वितर । एषः=अयम् । माधवः=तव सखा वसन्तः । पर्युत्सुकः=उत्कण्ठितः अस्ति । नृणां = नराणाम् ('स्युः पुमांसः पञ्चजनाः पुरुषाः पूरुषाः नराः' इत्यमरः) । दयितासु = प्रियासु । प्रेम = अनुरागः । अनवस्थितं — न अवस्थितमनवस्थितं तत्=अस्थिरम् । सुहृज्जने=मित्रे (प्रेम) । खलु=किल । चलं न=चञ्चलं न भवतीति ('चलनं कम्पनं कम्प्रं चलं लोलं चलाचलम्' इत्यमरः) ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

सरलार्थः--हे काम ! प्रत्यक्षमागच्छ। अयं ते सखा माधवः उत्कण्ठितोऽस्ति। नराणामनुरागो दयितासु अस्थिरः, मित्रे तु निश्चय केवलं न भवति

हिन्दी--हे काम ! अब दर्शन दो यह (तुम्हारा मित्र) वसन्त दर्शनों के लिए उत्सुक है। मनुष्यों का प्रेम प्रेयसियों पर अस्थिर होता है (पर) मित्र पर अस्थिर नहीं होता है ॥ २८ ॥

अमुना ननु पार्श्ववर्तिना जगदाज्ञां ससुरासुरं तव।
बिसतन्तुगुणस्य कारितं धनुषः पेलवपुष्पपत्रिणः ॥२९॥

अन्वयः—पार्श्ववर्तिना अमुना ससुरासुरं जगत् बिसतन्तुगुणस्य पेलवपुष्पपत्रिणः तव धनुषः आज्ञां कारितं ननु।

व्याख्या—अमुनेति। पार्श्ववर्तिना-पार्श्वे=समीपे वर्तत इति तेन=निकटस्थितेन। अमुना=अनेन। ससुरासुरम्—सुराश्च असुराश्च सुरासुराः, तैः सहितम्, तत्=सदेवदानवम् ('अमरा निर्जरा देवास्त्रिदशाः विबुधा सुराः। असुराः दैत्यदैतेयदनुजेन्द्रारिदानवाः' इति चाप्यमरः)। जगत् = भुवनम्। बिसतन्तुगुणस्य- बिसतन्वः=मृणालसूत्रार्थं गुणाः=यस्य तस्, तस्य = मृणालसूत्रमौर्वीकस्य। पेलवपुष्पपत्रिणः—पेलवानि पुष्पाणि एव पत्राणि यस्य सः पेलवपुष्पपत्री, तस्य = कोमलकुसुमसायकस्य। तव = ते स्मरस्य। धनुषः = कार्मुकस्य आज्ञाम् = आदेशम्। कारितम् = सम्पादयितं। ननु=खलु। (प्रश्नाऽवधारणानुज्ञाऽनुनयाऽऽमन्त्रणे ननु' इत्यमरः)।

सरलार्थः--निकटवर्तिना तव सुहृदाऽनेन वसन्तेन सदेवदानवं भुवनं मृणालसूत्रमौर्वीकस्य कोमलकुसुमशरस्य तव कार्मुकस्याज्ञां सम्पादितं खलु।

हिन्दी—समीपवर्ती तुम्हारे मित्र इस वसन्त ने देवताओं तथा राक्षसों सहित समस्त संसार को मृणालतन्तु की डोरी वाले कोमल पुष्पशरवाले तुम्हारे धनुष का आदेश पालन किया है ॥ २९ ॥

गत एव न ते निवर्तते स सखा दीप इवानिलाहतः।
अहमस्य दशेव पश्य मामविषह्यव्यसनेन धूमिताम् ॥३०॥

अन्वयः--स ते सखा अनिलाहतः दीपः इव गतः एव न निवर्तते, अहम् (अपि) अस्य दशा इव तिष्ठामि। अविषह्यव्यसनेन धूमितां मां पश्य।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

व्याख्या--गत इति । सः = असौ । ते = तव सखा = सहयोगी कामः । अनिलाहतः --अनिलेन = वायुना आहतः = ताडितः ('पृषदश्वो गन्धवहो गन्धवाहोऽनिलाशुगाः' इत्यमरः) । दीपः = दीपकः इव = यथा गतः = यातः एव न निवर्तते=न प्रत्यागच्छति । अहम्=रतिः । अस्य = एतस्य कामस्य दशा = अवस्था, वर्तिः इव । तिष्ठामि = वर्तये । ('दशावर्तावस्थायां वस्त्रान्ते स्युर्दशा अपि' इति विश्वः) । अविषह्यव्यसनेन–अविषह्य' च तद्व्यसनम् अविषह्यव्यसनं, तेन = दुःसहकष्टेन धूमिताम्--धूमः सञ्जातः यस्या सा धूमिता, ताम् = धूम्रवन्मलिनाम् । मां=रतिम् । पश्य=अवलोकय । अत्रोपमालङ्कारः ।

सरलार्थः—यथा पवनाहतः दीपः न प्रत्यागच्छति तथैव तव सखा कामः न निवर्तते । अहमस्य अवस्था इव तिष्ठामि । दुःसहदुःखेन धूम्रवन्मलिनां मामवलोकय ।

हिन्दी--(हे वसन्त !) पवन से निर्वापित (बुझाये गये) दीपक के समान तुम्हारे मित्र मदन भी वापस नहीं आ रहे हैं तथा मैं इन्हीं की दशा में स्थित हूँ । दुःसह कष्ट से धूम्रवत् मलिन मुझ रति को देखो ॥३०॥

विधिना कृतमर्धवैशसं ननु मां कामवधे विमुञ्चता ।
अनपायिनि संश्रयद्रुमे गजभग्ने पतनाय वल्लरी ॥३१॥

अन्वयः—ननु कामवधे माम् विमुञ्चता विधिना अर्धवैशसं कृतम् । अनपायिनि संशयद्रुमे गजभग्ने (सति) वल्लरी पतनाय भवति ।

व्याख्या—विधिनेति । ननु=खलु । कामवधे–कामस्य = मदनस्य वधे = विनाशे । माम् = रतिम् । विमुञ्चता=परित्यजता । विधिना=भाग्येन । अर्धवैशसं–अर्धं च तद् वैशसमर्धवैशसं, तत्=अर्धवधः । कृतम्=विहितम् । अनपायिनि–न अपायः अनपायः, अनपायोऽस्ति यस्य सः, तस्मिन् = अनश्वरे । संशयद्रुमे–संशयस्य द्रुमस्तस्मिन्=संशयपादपे । गजभग्ने—गजेन भग्नः गजभग्नस्तस्मिन्=हस्तिच्छिन्ने सति ('मतङ्गजो गजो नागः कुञ्जरो वारणः करी ।' इत्यमरः) । वल्लरी = वीरुधिः । पतनाय = विनाशाय भवति । अत्रार्थान्तरन्यासोऽलंकारः ।

सरलार्थः—कामं निहत्य मां च परित्यज्य दैवेनार्धवधः कृतः । अविनाशिनि आश्रयपादपे करिणा छिन्ने सति लता तु पतत्येव ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

हिन्दी—निश्चय ही पति (कामदेव) को मारकर तथा मुझे त्याग कर दैव ने अर्ध हिंसा कर ही डाली है। क्योंकि अविनाशी आश्रयवृक्ष के हाथी द्वारा विनाश कर दिये जाने पर लता स्वयं नष्ट हो जाती है ॥ ३१ ॥

पत्युसुसरणनिमित्तं रति तत्सामग्रीसम्पादनाय वसन्तं कथयति—

तदिदं क्रियतामनन्तरं भवता बन्धुजनप्रयोजनम्।
विधुरां ज्वलनातिसर्जनान्ननु मां प्रापय पत्युरन्तिकम् ॥३२॥

अन्वयः—तत् अनन्तरं भवता इदं बन्धुजनप्रयोजनं क्रियताम्। ननु विधुरां मां ज्वलनातिसर्जनात् पत्युः अन्तिकं प्रापय।

व्याख्या- तदिति। तद् = अतः। अनन्तरम् = अथ। भवता = त्वया। इदम् = एतत्। बन्धुजनप्रयोजनं-बन्धुजनस्य प्रयोजनं, तत् = बान्धवकृत्यम्। क्रियताम् = विधीयताम्। ननु = खलु। विधुराम् = विवशाम्। माम् = रतिम्। ज्वलनातिसर्जनात्-ज्वलतीति ज्वलनं तस्मै अतिसर्जनम्, तस्मात् = अग्निप्रदानात्। पत्युः=स्वामिनः कामस्य। अन्तिकम्=पार्श्वम्। प्रापय=नय।

सरलार्थः—(हे वसन्त !) अतः भाग्यप्रतिकूलतया पत्युरनुगमनाय विवशां मामग्निप्रदानात् बान्धवकृत्यं विधाय मां पत्युः पार्श्वं प्रापय।

हिन्दी—हे वसन्त ! अतएव भाग्य की प्रतिकूलता के कारण यह बान्धव-कार्य कीजिये। मुझ विवशा रति को अग्नि प्रदान कर पति के पास पहुँचा दीजिए ॥ ३२ ॥

पतिनष्टे सति स्त्रीकर्तव्यमाह रतिः—

शशिना सह याति कौमुदी सह मेघेन तडित्प्रलीयते।
प्रमदाः पतिवर्त्मगा इति प्रतिपन्नं हि विचेतनैरपि ॥३३॥

अन्वयः—कौमुदी शशिना सह याति, तडित् मेघेन सह प्रलीयते। प्रमदाः पतिवर्त्मगाः इति विचेतनैः अपि प्रतिपन्नम्।

व्याख्या—शशिनेति। कौमुदी =ज्योत्स्ना ('चन्द्रिका कौमुदी ज्योत्स्ना' इत्यमरः)। शशिना = चन्द्रेण सह=साकम्। याति=गच्छति। तडित् = विद्युत् ('तडित् सौदामिनी विद्युच्चञ्चला चपला अपि' इत्यमरः) मेघेन = घनेन सह ('अभ्रं मेघो वारिवाहः स्तनयित्नुर्बलाहकः' इत्यमरः)। प्रलीयते = प्रणश्यति।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri
प्रमदाः=स्त्रियः। पतिवर्त्मगाः—पत्युः वर्त्म इति पतिवर्त्म, तस्मिन् गच्छन्तीति पतिवर्त्मगाः = भर्तृमार्गगामिन्यः भवन्ति इति विचेतनैः—विगता चेतना येषां ते, तैः=अविवेकिभिः अपि। प्रतिपन्नम् = ज्ञातम्।

सरलार्थः—चन्द्रस्यास्तंगते चन्द्रिकाऽप्यस्तं याति। विद्युत् घन-विलीने सति लयं याति। स्त्रियः पतिमार्गमनुसरन्ति इति अचेतनैरपि ज्ञातं तर्हि सचेतनानां वार्तैव का।

हिन्दी—चन्द्रमा के अस्त हो जाने पर चाँदनी भी अस्त हो जाती है, बादल के नष्ट होने पर बिजली भी नहीं दिखलाई पड़ती है (जब) अचेतन भी अपने-अपने पति का अनुगमन करते हैं तो सचेतन होकर मैं पति का अनुगमन क्यों न करूँ ॥ ३३ ॥

टिप्पणी—पति के मार्ग का अनुसरण करना मनुस्मृति में इस प्रकार कहा गया है—

आर्त्ताऽऽर्त्ते मुदिते हृष्टा प्रोषिते मलिनाकृतिः।
मृते म्रियेत या पत्यौ सा स्त्री ज्ञेया पतिव्रता ॥ इति ॥

अमुनैव कषायितस्तनी सुभगेन प्रियगात्रभस्मना।
नवपल्लवसंस्तरे यथा रचयिष्यामि तनुं विभावसौ ॥३४॥

अन्वयः—अमुना सुभगेन प्रियगात्रभस्मना एव कषायितस्तनी नवपल्लवसंस्तरे यथा विभावसौ तनुं रचयिष्यामि।

व्याख्या- अमुनैवेति। अमुना = अनेन। सुभगेन=मनोरमेण। प्रियगात्रभस्मना—प्रियस्य गात्रं प्रियगात्रं, तस्य भस्म, तेन = दयितशरीरभूत्या एव। कषायितस्तनी—कषायः सञ्जातो ययोः तौ कषायितौ, तादृशौ स्तनौ यस्याः सा = रञ्जितपयोधरी। नवपल्लवसंस्तरे—नवाश्चते पल्लवाः नवपल्लवाः, तेषां संस्तरस्तस्मिन् = नूतनकिसलयतल्पे ('गात्रं वपुः संहननं शरीरं वर्ष्म विग्रहः'। 'रागे क्वाथे कषायेऽस्त्री' इति। 'प्रत्यग्रोऽभिनवो नव्यो नवीनो नूतनो नव' इति। 'पल्लवोऽस्त्री किसलयमिति' चामरः)। यथा = इव।
Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

विभावसौ = अग्नौ ('सप्तार्चिर्दमुनाः शुक्रश्चित्रभानुर्विभावसुः ।' इत्यमरः) तनुं = शरीरं । रचयिष्यामि = विधास्यामि । अत्रोपमालङ्कारः ।

सरलार्थः--अनेन पुरोवर्तिना मनोहरेण प्रियशरीरभस्मनैवानुलिप्तकुचा नूतनकिसलयतल्पे यथा वह्नौ शरीरं निधास्यामि ।

हिन्दी--इस मनोहर प्रिय के गात्र की भस्म से ही चन्दन के समान अपने शरीर में लगाकर नवीन किसलय-पलंग-सदृश अग्नि में शरीर को रखूँगी (चिताग्नि में जल जाऊँगी) ॥ ३४ ॥

कुसुमास्तरणे सहायतां बहुशः सौम्य ! गतस्त्वमावयोः !
कुरु सम्प्रति तावदाशु मे प्रणिपाताञ्जलि याचितश्चिताम् ॥३५॥

अन्वयः—हे सौम्य ! त्वम् आवयोः बहुशः कुसुमास्तरणे सहायतां गतः असि, सम्प्रति प्रणिपाताञ्जलियाचितः तावत् आशु मे चितां कुरु ।

व्याख्या—कुसुमेति । सौम्य = हे साधो ! त्वम् = भवान् । आवयोः = रतिकामयोः । बहुशः = बहुधा । कुसुमास्तरणे—कुसुमानामास्तरणं कुसुमास्तरणं, तस्मिन् = पुष्पशय्यायाम् । सहायतां=सहयोगम् । गतः = प्राप्तः असि । सम्प्रति = साम्प्रतम् । प्रणिपाताञ्जलियाचितः--प्रणिपातस्याञ्जलिः प्रणिपाताञ्जलिः, तेन याचितः=नमस्काराञ्जलिप्रार्थितः सन् । तावत् = तावत्कालम् । आशु = शीघ्रम् ('सत्वरं चपलं तूर्णमवलम्बितमाशु च' इत्यमरः) । मे= मम । चिताम् = काष्ठसञ्चयम् । कुरु = विधेहि ।

सरलार्थः--हे सौम्य ! त्वमनेकवारमावयोः सुरतावसरे सहायतामकरोः । अधुना नमस्काराञ्जलिप्रार्थितस्त्वं तावच्छीघ्रं मे चितां रचयस्व ।

हिन्दी—हे सौम्य वसन्त ! तुम हम दोनों (रति तथा काम) को अनेक बार सुरत के अवसर पर सहायता कर चुके हो, अब इस समय भी मैं हाथ जोड़कर तुमसे प्रार्थना कर रही हूँ कि शीघ्र मेरे लिए चिता तैयार कर दो ॥ ३५ ॥

तदनु ज्वलनं मदर्पितं त्वरयेर्दक्षिणवातवीजनैः ।
विदितं खलु ते यथा स्मरः क्षणमप्युत्सहते न मां विना ॥३६॥

अन्वयः—तदनु मदर्पितं ज्वलनं दक्षिणवातवीजनैः त्वरयेः । ते विदितं खलु यथा स्मरः मां विना क्षणम् अपि न उत्सहे ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

व्याख्या—तदन्विति। तदनु = तत्पश्चात्। मदर्पितम् = मयि समर्पितम्। ज्वलनं = दहनम्। ('कृपीटयो निर्ज्वलनो जातवेदास्तनूनात्' इत्यमरः)। दक्षिणवातवीजनैः—दक्षिणस्य वातस्तेन वीजनानि, तैः=दक्षिणानिलसञ्चारणैः। त्वरयेः = शीघ्रं प्रज्वलय। ते = तव। विदितं = ज्ञातम्। खलु=किल। यथा=येन प्रकारेण। स्मरः=मारः ('मदनो मन्मथो मारः प्रद्युम्नो मीनकेतनः। कन्दर्पो दर्पकोऽनङ्गः कामः पञ्चशरः स्मरः' इत्यमरः)। मां = रतिम् विना। क्षणम् अपि = निमिषमात्रमपि। न उत्सहते = उत्साहं न करोति।

सरलार्थः—(हे वसन्त) चितारचनानन्तरं मयि समर्पितं वह्निं दक्षिणानिलसञ्चरणैः शीघ्रं प्रज्वालय। तव विज्ञातमस्ति यत् कामो मया विना क्षणमपि स्थातुं नोत्सहते।

हिन्दी—हे वसन्त! चिता तैयार करनेके पश्चात् मुझे आग देकर दक्षिणानिल के सञ्चार से शीघ्र जला दो। तुझे ज्ञात ही है कि मेरे विना मदन क्षणभर भी रहना नहीं चाहते हैं॥ ३६॥

इति चापि विधाय दीयतां सलिलस्याञ्जलिरेक एव नौ।
अविभज्य परत्र तं मया सहितः पास्यति ते स बान्धवः॥३७॥

अन्वयः—अपि च इति विधाय नौ एक एव सलिलस्य अञ्जलिः दीयताम्। तं स ते बान्धवः परत्र मया सहितः अविभज्य पास्यति।

व्याख्या—इति चापीति। अपि च = पुनश्च। इति = एवम्। विधाय = कृत्वा। नौ = आवाम्। एकः = एकलः एव। सलिलस्य = जलस्य। अञ्जलिः = तर्पणाञ्जलिः। दीयताम् = वितीर्यताम्। ('आपः स्त्री भूम्नि वार्वारि सलिलं कमलं जलम्' इत्यमरः)। तं = जलाञ्जलिम्। सः = असौ। ते = तव वसन्तस्य, बान्धवः = बन्धुः कामः। परत्र = परलोकम्। मया = रत्या-सहितः। अविभज्य = विभागमकृत्वैव, मिलित्वा, इत्यर्थः। पास्यति = पानं करिष्यति।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

सरलार्थः—पुनश्च एवं कृत्वाऽऽवामेक एव जलाञ्जलिर्वितीर्यताम् । तं जलाञ्जलिमसौ तव बन्धुः परलोके मया सह मिलित्वा पानं करिष्यति ।

हिन्दी—और फिर इस प्रकार कार्य करके हम (रति तथा काम) दोनों को एक ही जलाञ्जलि दीजिए ताकि उस जलाञ्जलि को तुम्हारा बन्धु कामदेव परलोक में मेरे साथ मिलकर पान कर सके ॥ ३७ ।

परलोकविधौ च माधव ! स्मरमुद्दिश्य विलोलपल्लवाः ।
निवपेः सहकारमञ्जरीः प्रियचूतप्रसवो हि ते सखा ॥३८॥

अन्वयः—हे माधव ! परलोकविधौ स्मरम् उद्दिश्य विलोलपल्लवा सहकारमञ्जरीः निवपेः हि ते सखा प्रियचूतप्रसवः अस्ति ।

व्याख्या—परलोकेति । हे माधव = अयि वसन्त ! परलोकविधौ—परलोकस्य = लोकान्तरस्य विधौ = विधाने । स्मरम् = मदनम् ('कन्दर्पो दर्पकोऽनङ्गः कामः पञ्चशरः स्मरः' इत्यमरः) । उद्दिश्य = उद्देश्यं कृत्वा । विलोलपल्लवाः—वि = विशेषेण = लोलाः पल्लवाः यासु ताः = चञ्चलकिसलयाः ('चलनं कम्पनं कम्पं चलं लोलं चलाचलम्' इत्यमरः) । ('पल्लवोऽस्त्री किसलयम्' इत्यमरः) । सहकारमञ्जरी—सहकारस्य = आम्रस्य मञ्जर्यस्ताः=आम्रवल्लरीः ('आम्रश्चूतो रसालोऽसौ सहकारोऽतिसौरभः' इत्यमरः) । ('वल्लरी मञ्जरी स्त्रियौ' इत्यमरः) । निवपेः=देहि । हि = यतः । ते = तव । सखा = मित्रम् । प्रियचूतप्रसवः—चूतस्य प्रसवाश्चूतप्रसवाः, प्रियाश्चूतप्रसवाः यस्य सः=अभीष्टाम्रमञ्जरीः । अस्ति ।

सरलार्थः—हे वसन्त ! कामस्यौर्ध्वदैहिकं कार्यं कुर्वति श्राद्धे चञ्चलकिसलययुक्तमाम्रमञ्जरीमधिकमभिलषति ।

हिन्दी—हे माधव परलोक के विधान में मदन को लक्ष्य कर चञ्चल पल्लवोंवाली आम्रमञ्जरी अवश्य देना, क्योंकि तुम्हारे मित्र काम को भी आम्रमञ्जरी प्रिय थी ॥ ३८ ॥

इति देहविमुक्तये स्थितां रतिमाकाशभवा सरस्वती ।
शफरीं ह्रदशोषविक्लवां प्रथमा वृष्टिरिवान्वकम्पयत् ॥३९॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

अन्वयः--इति देहविमुक्तये स्थितां रतिम् आकाशभवा सरस्वती ह्रद-शोषविक्लवां शफरीं प्रथमा वृष्टिः इव अन्वकम्पयत् ।

व्याख्या--इति देहेति । इति=एवम् । देहविमुक्तये--देहस्य विमुक्तिः, तस्मै=शरीरत्यागाय । स्थिताम्=अवस्थिताम् । रतिम्=अनङ्गपत्नीम् । आकाश-भवा=आकाशाद् भवा आकाशभवा = अम्बरोत्पन्ना । सरस्वती = वाग्वी ('वियद् विष्णुपदं वा तु पुंस्याकाशविहायसी' इत्यमरः । 'ब्राह्मी तु भारती भाषा गीर्वाग्वाणी सरस्वती' इत्यमरः) । ह्रदशोषविक्लवां—ह्रदस्य शोषः ह्रदशोषः, तेन विक्लवा, ताम्=तडागशोषव्याकुलाम् ('तत्रागाधजलो ह्रदः' इत्यमरः) । शफरीं=प्रोष्ठीमिति मत्स्यविशेषाम् ('प्रोष्ठी तु शफरी द्वयोः' इत्यमरः) । प्रथमा=आरम्भिकी । वृष्टिः इव=वर्षणं यथा । अन्वकम्पयत् = अनुकम्पां चकार । अत्रोपमालङ्कारः ।

सरलार्थः—ग्रीष्मावसाने यथा प्रारम्भिकी वृष्टिस्तडागशोषविह्वलां शफरीं मत्स्यविशेषामनुकम्पयति, तथैव शरीरत्यागाय स्थितां रतिं गगनोत्पन्ना वाणी अनुकम्पां चकार ।

हिन्दी--जिस प्रकार गर्मी समाप्त होने पर प्रथम वर्षा तालाब के सूख जाने से व्याकुल शफरी मछली के प्राणों का सञ्चार कर देती है उसी प्रकार शरीर त्याग के लिए तैयार खड़ी रति के ऊपर आकाशवाणी ने अनुकम्पा की (आकाशवाणी हुई) ॥ ३९ ॥

कुसुमायुधपत्नि ! दुर्लभस्तव भर्ता न चिराद्भविष्यति ।
शृणु येन स कर्मणा गतः शलभत्वं हरलोचनार्चिषि ॥४०॥

अन्वयः--हे कुसुमायुधपत्नि ! तव भर्ता चिरात् दुर्लभः न भविष्यति । शृणु, येन कर्मणा सः हरलोचनार्चिषि शलभत्वं गतः ।

व्याख्या--कुसुमायुधेति । हे कुसुमायुधपत्नि-कुसुमान्यायुधं यस्य सः, तस्य पत्नी तत्संबुद्धौ—हे कामपत्नि ! ('पत्नी पाणिगृहीती च द्वितीया सहचारिणी' इत्यमरः) । तव=ते । भर्ता=पतिः, कामः । चिरात्=अधिककालम् । दुर्लभः = दुष्प्राप्यः न भविष्यति, शीघ्रमेव मिलिष्यति इत्याशयः । शृणु=आकर्णय । येन

SRI Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

कर्मणा=येन कृत्येन । सः=असौ कामः । हरलोचनार्चिषि—हरस्य लोचनं हरलोचनं, तस्य अर्चिः, तस्मिन्=शिवनेत्राग्नौ । शलभत्वं=शलभस्य भावः शलभत्वम्=पतङ्गदशाम् ('समौ पतङ्गशलभौ' इत्यमरः) गतः=प्राप्तः ।

सरलार्थः—हे कामभार्ये ! तव पतिः शीघ्रमेव सुलभो भविष्यति । यस्य कर्मणः प्रभावात् शिवनेत्राग्नौ भस्मीभूतो जातः, तच्छृणु ।

हिन्दी--हे कुसुमायुधपत्नि ! तुम्हारे पति कामदेव तुम्हें शीघ्र ही प्राप्त होंगे । जिस कर्म से वह शिवजी की नेत्राग्नि से भस्म हुये हैं, उसे सुनो ॥४०॥

अभिलाषमुदीरितेन्द्रियः स्वसुतायामकरोत्प्रजापतिः ।
अथ तेन निगृह्य विक्रियामभिशप्तः फलमेतदन्वभूत् ॥४१॥

अन्वयः--उदीरितेन्द्रियः प्रजापतिः स्वसुतायाम् अभिलाषम् अकरोत् । अथ तेन विक्रियाम् निगृह्य अभिशप्तः सन् एतत् फलम् अन्वभूत् ।

व्याख्या--अभिलाषमिति । उदीरितेन्द्रियः-- उदीरितमिन्द्रियं यस्य सः उदीरितेन्द्रियः=कामसंक्षोभितमनाः । प्रजापतिः=प्रकर्षेण जायन्ते इति प्रजाः, तासां पतिः-विधाता । स्वसुतायां--स्वस्य=आत्मनः सुता=पुत्री, तस्यां=सरस्वत्याम् । अभिलाषम्=कामनाम् ('कामोऽभिलाषस्तर्षश्च' इत्यमरः) । अकरोत्=चकार । अथ=अनन्तरम् । तेन=ब्रह्मणा । विक्रियाम्=विकारम् । निगृह्य=अवरुध्य । अभिशप्तः सन्=दत्तशापः सन् । एतत्=इदम् । फलम्=परिणामम् । अन्वभूत्=अनुभूतवान् ।

सरलार्थः--कामेन संक्षोभितमनाः विधाता स्वपुत्र्यां सरस्वत्यामभिलाषमकरोत् । अनन्तरं ब्रह्मणा इन्द्रियस्य विकारं निरुध्य विहितशापाः सन् इदं फलमनुभूतवान् ।

हिन्दी--काम के द्वारा क्षुभितमन ब्रह्मा अपनी पुत्री सरस्वती को उत्पन्न कर (प्राचीन काल में) उन पर मुग्ध हो गये थे । अनन्तर ब्रह्मा जी ने इन्द्रिय विकार को रोककर काम को शाप दिया कि तुम इसका फल भोगोगे (अर्थात् शिवजी की नेत्राग्नि से भस्म हो जाओगे) ॥ ४१ ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

अथ शापावधिरपि तेनोक्ता--

परिणेष्यति पार्वतीं यदा तपसा तत्प्रवणीकृतो हरः।
उपलब्धसुखस्तदा स्मरं वपुषा स्वेन नियोजयिष्यति ॥४२॥

अन्वयः-तपसा तत्प्रवणीकृतः हरः यदा पार्वतीं परिणेष्यति, तदा उपलब्धसुखः सन् स्मरं स्वेन वपुषा नियोजयिष्यति।

व्याख्या-परिणेष्यतीति। तपसा=तपश्चर्येण। तत्प्रवणीकृतः-तत् तस्यां=पार्वत्यां प्रवणीकृतः=सम्मुखीकृतः। हरः=शिवः। यदा=यावत्काले। पार्वतीम् उमाम्। परिणेष्यति=विवाह करिष्यति तदा। उपलब्धसुखः=उपलब्धं सुखं येन सः=प्राप्तानन्दः सन् ('स्यादानन्दथुरानन्दशर्मशातसुखानि च' इत्यमरः)। स्मरम्=मदनम्। स्वेन=निजेन। वपुषा=शरीरेण। नियोजयिष्यति=संयोजयिष्यति।

सरलार्थः—तपस्यया पार्वतीसम्मुखमागतः शिवः यदा पार्वतीं परिणेष्यति, यदा प्राप्तानन्दः सन् मदनमात्मना शरीरेण संयोजयिष्यति।

हिन्दी-तपस्या से प्रसन्न होकर सम्मुख प्रकट होकर शिवजी जब पार्वती से पाणिग्रहण करेंगे, तभी सुख प्राप्त कर मदन को वह (शिवजी) (अपने नयनानल से) अपने शरीर से सम्पन्न कर देंगे ॥ ४२ ॥

इति चाह स धर्मयाचितः स्मरशापावधिदां सरस्वतीम्।
अशनेरमृतस्य चोभयोर्वशिनश्चाम्बुधराश्च योनयः ॥४३॥

अन्वयः--धर्मयाचितः सः इति स्मरशापावधिदां सरस्वतीं च आह। वशिनः अम्बुधराः च अशनेः अमृतस्य च उभयोः योनयः भवन्ति।

व्याख्या—इति चाहेति। धर्मयाचितः—धर्मेण=धर्मनामकप्रजापतिना याचितः=प्रार्थितः। सः=असौ विधाता। इति=इत्थम्। स्मरशापावधिदां--स्मरस्य शापः स्मरशापः, अवधिं ददातीत्यवधिदा ताम्=स्मरशापस्यावधिदा इति सा=कामशापावसानदायिनीम्। सरस्वतीम्=ब्राह्मीम् ('ब्राह्मी तु भारती भाषा गीर्वाणवाणी सरस्वती' इत्यमरः)। च आह=प्राह। वशिनः—वशः अस्ति येषां ते वशिनः=जितेन्द्रियाः। अम्बुधराः--अम्बूनि धरन्तीत्यम्बुधराः=वारिदाः च ('धाराधरो जलधारस्तडिद्वान्वारिदोऽम्बुभृत्' इत्यमरः) अशनेः=वज्रस्य

CC-O. Vidyabhaiaratna Sangrahalaya. Varanasi

CC-O. In Public Domain. Digitized by eGangotri

('शतकोटिः स्वरुः शम्बो दम्भोलिरशनिर्द्वयोः' इत्यमरः)। अमृतस्य पीयूषस्य ('पीयूषममृतं सुधा' इत्यमरः)। च योनय=प्रभवः भवन्ति।

सरलार्थः—धर्मेण प्रार्थितो ब्रह्मा स्मरशापविमुक्तिदायिनीं वाणीमाह—"शिव-पार्वतीविवाहावसरे शिवप्रसादादेव पुनः स्मरः सदेहो भविष्यतीति" यतो हि जितेन्द्रियाः महापुरुषाः जलदाश्च वज्रस्यामृतस्य चोभयोरुत्पत्तिस्थानानि भवन्तीति। एवं हि महापुरुषाः शापप्रसादयोरुभयोरेव समर्थाः सन्ति।

हिन्दी—धर्म के द्वारा प्रार्थित ब्रह्मा ने "काम शाप से मुक्त हो जायेंगे" इस प्रकार कामशापमुक्तिदायिनी वाणी कही। क्योंकि जितेन्द्रिय महापुरुष तथा मेघ, वज्र एवं अमृत दोनों के उत्पत्तिस्थान होते हैं। (अर्थात् शिव द्वारा भस्मसात् काम शिव-पार्वती विवाहावसर पर पुनः शिव द्वारा ही शाप विमुक्त हो जायेंगे। क्योंकि महापुरुषों के अन्दर शाप-शक्ति तथा आशीर्वाद-शक्ति दोनों रहते हैं। जैसे मेघ के अन्दर अग्नि (बिजली) तथा जल (अमृत) दोनों ही रहते हैं।)॥ ४३॥

तदिदं परिरक्ष शोभने! भवितव्यप्रियसङ्गमं वपुः।
रविपीतजला तपात्यये पुनरोघेन हि युज्यते नदी॥४४॥

अन्वयः—हे शोभने! तत् भवितव्यप्रियसङ्गमम् इदम् वपुः परिरक्ष। हि रविपीतजला नदी तपात्यये पुनः ओघेन युज्यते।

व्याख्या—तदिति। हे शोभने = हे सुन्दरि! तत् = तस्मात्। भवितव्य-प्रियसङ्गमम्—भवितुं योग्यः भवितव्यः प्रियेण संगमः प्रियसङ्गमः, भवितव्यः प्रियसङ्गमो यस्य तत्=भाविप्रियसमागमम्। इदम् = एतत्। वपुः = शरीरम्। परिरक्ष = सर्वतः पाहि। हि=यतः। रविपीतजला-रविणा पीतं जलं यस्याः सा=शुष्का। ('भानुर्हंसः सहस्रांशुस्तपनः सविता रविः' इत्यमरः)। नदी=सरिता तपात्यये-तपस्य = घर्मस्यात्ययः = नाशः, तस्मिन् = वर्षर्तौ ('निदाघ उष्णो-पगमः उष्णः उष्णागमः तपः' इत्यमरः)। पुनः=भूयः। ओघेन = प्रवाहेण। युज्यते=संगच्छते। अत्रार्थान्तरन्यासोऽलङ्कारः।

सरलार्थः—हे सुन्दरि! अतएव भाविप्रियतमसमागमे एतच्छरीरं सर्व-प्रकारेण रक्ष। यतः सूर्यातपशोषिता नदी प्रावृटि पुनः प्रवाहयुक्ता भवति।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

हिन्दी--हे शोभने ! अतएव होने वाले प्रियतम के समागम निमित्त इस शरीर की रक्षा करो; क्योंकि सूर्य के आतप से सुखाई गई नदी पुनः वर्षाकाल में प्रवाहयुक्त हो जाती है ॥ ४४ ॥

साम्प्रतमाकाशवाणीमुपसंहरति—

इत्थं रतेः किमपि भूतमदृश्यरूपं मन्दीचकार मरणव्यवसायबुद्धिम् ।
तत्प्रत्ययाच्चकुसुमायुधबन्धुरेनामाश्वासयत्सुचरितार्थपदैर्वचोभिः ॥४५॥

अन्वयः—इत्थम् अदृश्यरूपं किमपि भूतं रतेः मरणव्यवसायबुद्धिं मन्दीचकार । अथ कुसुमायुधबन्धुः च तत्प्रत्ययात् एनां सुचरितार्थपदैः वचोभिः आश्वासयत् ।

व्याख्या--इत्थमिति । इत्थम् = अनेन प्रकारेण । अदृश्यरूपम् = अनवलोक्यरूपम् । किम् अपि भूतम् = कश्चित् । जीवः रतेः = कामभार्यायाः । मरणव्यवसायबुद्धिं = मरणस्य व्यवसायः, तस्मिन् बुद्धिस्ताम् = मृत्युव्यापारमतिम् ('बुद्धिर्मनीषा धिषणा धीः प्रज्ञा शेमुषी मतिः' इत्यमरः) । मन्दीचकार = शिथिलाम् अकरोत् । अथ = अनन्तरम् । कुसुमायुधबन्धुः-कुसुमानि आयुधं यस्य सः कुसुमायुधस्तस्य बन्धुः = कामसखा । च । तत्प्रत्ययात्—तस्य = प्राणिनः प्रत्ययात् = विश्वासात् । एनाम् = एताम् रतिम् । सुचरितार्थपदैः— सुष्ठुचरितार्थानि सुचरितार्थानि, तानि पदानि येषां तानि, तैः=सुचरितार्थशब्दैः । वचोभिः=वाक्यैः ('व्यवहार उक्तिर्लपितं भाषितं वचनं वचः' इत्यमरः) । आश्वासयत् = धैर्यमधारयत् । वसन्ततिलकावृत्तम् । तद्यथा—उक्ता वसन्ततिलका तभजाजगौगः ।

सरलार्थः--अनेन प्रकारेणावलोकनीयस्वरूपं कश्चित्प्राणी रतेर्मरणव्यवसायमतिं शिथिलितवान् । अनन्तरं कामसखा माधवश्च देववाण्यां विश्वासात् रतिं सुचरितार्थशब्दैः वाक्यैः आश्वासितवान् ।

हिन्दी--इस प्रकार किसी अदृश्य देववाणी ने रति के मरण व्यापार की बुद्धि को शिथिल कर दिया । इसके पश्चात् कुसुमायुधसखा वसन्त वाणी के विश्वास से रति को सुचरितार्थ शब्दों वाले वाक्यों से आश्वासन देने लगा ।४५।

Sri Vijaybharati Book Centre, Srinagar

CC-O. In Public Domain. Digitized by eGangotri

अथ मदनवधूरुपप्लवान्तं व्यसनकृशा परिपालयाम्बभूव।
शशिन इव दिवातनस्य लेखा किरणपरिक्षय धूसरा प्रदोषम् ॥४६॥

अन्वयः--अथ व्यसनकृशा मदनवधूः उपप्लवान्तं किरणपरिक्षयधूसरा दिवातनस्य शशिनः लेखा प्रदोषम् इव परिपालयाम्बभूव।

व्याख्या--अथेति। अथ = अनन्तरम्। व्यसनकृशा-व्यसनेन = दुःखेन कृशा=क्षामा। मदनवधूः--मदनस्य वधूः=कामभार्या। उपप्लवान्तम्-उपप्लवस्यान्तम्, तत् = विपत्यवधिम्। किरणपरिक्षयधूसरा किरणानां परिक्षयस्तेन-धूसरा = रश्मिनाशधूसरवर्णा। दिवातनस्य=दिवसभवस्य। शशिनः = चन्द्रस्य लेखाः = रेखाः। प्रदोषम् इव=सन्ध्याकालमिव। परिपालयाम्बभूव=प्रतीक्षां चक्रे। अत्रोपमालंकारः।

सरलार्थः--आकाशवाण्याः वसन्तस्य चाश्वासनानन्तरं क्षीणकाया कामपत्नी रतिः विपत्यवधिं मयूखपरिक्षयधूसरवर्णा दिवाभवस्य चन्द्रस्य कलाः सांध्यकालमिव प्रतीक्षां चक्रे।

हिन्दी--आकाशवाणी तथा कामसखा वसन्त के द्वारा धैर्य धारण कराने के उपरान्त दुःख से दुर्बलकाय मदनवधू रति शाप की समाप्ति की जैसे ही प्रतीक्षा करने लगी जैसे दिन में निकले चन्द्रमा की कलाएँ संध्याकाल की प्रतीक्षा करती हैं॥ ४६॥

इति महाकविकालिदासकृतकुमारसम्भवस्य
पं० परमेश्वरदीनपाण्डेयव्याख्यातस्य
'सुधा-संस्कृत-हिन्दी' व्याख्या-
द्वयोपेतस्य चतुर्थः सर्गः

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

चतुर्थसर्गस्य श्लोकानुक्रमणिका

श्लोकाः	श्लोकाङ्काः	श्लोकाः	श्लोकाङ्काः
अथ तैः परि	२५	कृतवानसि	७
अथ मदनबधू	४६	क्रियातो कथं	२२
अथ मोहपरा	१	क्वनु ते हृदयङ्ग	२४
अथ सा	४	क्व नु माम्	६
अभिलाषम्	४१	गत एव न ते	३०
अमुना ननु	२९	तमवेक्ष्य	२६
अमुनैव कषा	३४	तदनु ज्वलनं	३६
अयि जीवित	३	तदिदं क्रिय	३२
अयि सम्प्रति	२८	तदिदं परिरक्ष	४४
अलिपङ्क्तिः	१५	नयना	१२
अवगम्य	१३	परलोकनव	१०
अवधानपरे	२	परलोकविधौ	३८
अहमेत्य	२०	परिणेष्यति	४२
इति चाऽपि	३७	प्रतिपद्य	१६
इति चाह स	४३	मदनेन विना	२१
इति चैनमुवा	२७	रचितं रतिपंडि	१९
इति देहविमु	३९	रजनीतिमिर	११
इति द्विजातौ	७४	विधिना कृतम्	३१
इत्थं रतेः	४५	विबुधेरसि	१९
उपमानमभूद	५	शशिना सह	३३
ऋजुतां नयतः	२३	शिरसा प्रणि	१७
कुसुमायुधपति	४०	शिलाशयाम्	२५
कुसुमास्तरेण	३५	स्मारसि स्मर	८

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

Sri Vidyabharathi Book Centre, Sringeri

परीक्षोपयोगी महत्त्वपूर्ण प्रकाशन

CC-0. In Public Domain. Digitized by eGangotri

चन्द्रालोकः । 'पौर्णमासी' संस्कृत तथा 'कथाभट्टी' हिन्दीटीका २०-००

ध्वन्यालोकः । 'दीधिति' संस्कृत-हिन्दी टीका ५०-००

सांख्यकारिका । गौडपाद भाष्य तथा हिन्दी टीका १०-००

भट्टिकाव्यम् । 'चंद्रकला' 'विद्योतिनी' सं.हि.टीका १-६ सर्ग४०-००,७-११ सर्ग ४०-००, १२-२२ सर्ग ४०-००, १-४ सर्ग २०-००, ५-८सर्ग ४०-००

प्रतिमानाटकम् । 'प्रकाश' संस्कृत हिन्दी टीका २०-००

मालविकाग्निमित्रम् । 'प्रकाश' संस्कृत हिन्दी टीका शीघ्र

अर्थसंग्रहः । 'मीमांसार्थसंग्रहकौमुदी' संस्कृत हिन्दी टीका २०-००

तर्कभाषा । 'तत्त्वालोक' संस्कृत हिन्दी टीका २०-००

मुद्राराक्षसनाटकम् । 'शशिकला' संस्कृत हिन्दी टीका ३५-००

मालतीमाधवम् । 'चन्द्रकला' संस्कृत हिन्दी टीका ५०-००

चैतन्यचन्द्रोदयनामनाटकम् । 'प्रकाश' हिन्दी टीका ४०-००

अमरुशतकम् । 'रसिकसंजीविनी' तथा 'प्रकाश' हिन्दी टीका शीघ्र

साहित्यदर्पणम् । 'चन्द्रकला' संस्कृत हिन्दी टीका । १--६ परिच्छेद ८०-००
७-१० परिच्छेद ७०--०० संपूर्ण १५०-००

सांख्यतत्त्वकौमुदी । 'तत्त्वचंद्रिका' हिन्दी व्याख्या सहित ३५-००

रामायणमञ्जरी । क्षेमेन्द्रविरचित । सम्पा०--काशीनाथ पाण्डुरंग १००-००

शिशुपालवधम् । मल्लिनाथ सूरि कृत 'सर्वंकषा' व्याख्या १००-००

रत्नावलीनाटिका । 'कमलेश्वरी' संस्कृत हिन्दी टीका २५-००

अभिसारकम् । 'कमलेश्वरी' संस्कृत हिन्दी टीका २०-००

वेणीसंहारनाटकम् । 'कमलेश्वरी' संस्कृत हिन्दी टीका ४०-००

विक्रमोर्वशीयम् । 'विनोद' संस्कृत हिन्दी टीका १०-००

ऋग्वेदभाष्यभूमिका । हिन्दी व्याख्या सहित २०-००

दशकुमारचरितम् । 'चन्द्रकला' सं. हि. व्याख्या, पूर्वपीठिका सहित १५-००

मृच्छकटिकम् । सविमर्श 'भावप्रकाशिका' संस्कृत-हिन्दी व्याख्या सहित । व्याख्याकार--डॉ० जयशंकरलाल त्रिपाठी ७०-००

शिशुपालवधम् । 'आशुबोधिनी' संस्कृत हिन्दी व्याख्या । प्रथम सर्ग, ८-००
द्वितीय सर्ग ८-००, तृतीय सर्ग ८-००, चतुर्थ सर्ग ८-००,१-४सर्ग १५-००

कुमारसंभवम् । सान्वय 'सुधा' संस्कृत हिन्दी टीका १--५ सर्ग २३-००
प्र. सर्ग ४-००, द्वि. सर्ग ४-००, तृ. सर्ग ४-००, च. सर्ग४-००, पं. सर्ग७-००

प्राप्तिस्थानम्–कृष्णदास अकादमी, पो० बा० ११८, वाराणसी–२२१००१

CC-0. Jangamwadi Math Collection. Digitized by eGangotri